दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णप्रतिपदा
श्रावण 14 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-280 | 1 | जुलाई 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 "मण्डी@५००" धरोहर-अध्ययन-यात्रायै कुलपतिः हरित-ध्वजं प्रदर्श्य प्रस्थानम् अकारयत्।

3 कर्मचारिणां वरिष्ठता-प्रकरणे हिमाचल- सर्वकाराय सर्वोच्च-न्यायालयात् प्रत्याघातः, विशेष-अनुमति- याचिका (SLP) निरस्ता

8 "केन्द्रीयसंस्कृतविश्वविद्यालये गुरुपूर्णिमामहोत्सवः : गुरुः जीवनस्य पथप्रदर्शक इति प्रतिपादितम्

## पाकिस्तानाधिकृत - जम्मू-काश्मीरे पाकिस्तान-बलैः नृशंस-कार्याचरणस्य-पश्चात् मृतकानां सङ्ख्या चत्वारिंशत् यावत् सम्प्राप्ता



पाकिस्तानाधिकृत-जम्मू-कश्मीर्-प्रदेशे वर्धमान अशान्तेः मध्ये पाकिस्तानी सैनिकैः कृतस्य क्रूर-दमनस्य समये गतदिनयोः न्यूनातिन्यूनं चत्वारिंशत् जनाः मृताः, बहवः जनाः व्रणिताः च अभवन्। प्रतिवेदनानि उद्धृत्य, युनाईटेड्-कश्मीर्-पीपल्स्-नैशनल्-पार्टी इत्यनेन बुधवासरे आरोपितं यत् रावलकोट्, मीरपुर इत्यादिषु क्षेत्रेषु जुलाई सप्तविंशतितः अष्टाविंशति पर्यन्तं प्रायः चत्वारिंशत् नागरिकाः मारिताः, अन्ये च नैके व्रणिताः, केचन कारणं विनैव निगडिताः।

## गृह-मन्त्री अमितशाहः असमराज्ये जलाप्लावनस्य समीक्षाम् अकरोत्; 'सङ्कटावधौ केन्द्रेण असम-राज्याय सर्वविध-साहाय्यं प्रदास्यते' -शाहः



केन्द्रीय-गृहमन्त्री अमितशाहः असमस्य मुख्यमन्त्रिणा डॉ. हेमन्त-बिसवा-सरमा इत्यमुना सह वार्तालापं विधाय ऊर्ध्व-असमक्षेत्रे प्रवृत्तस्य विनाशकारि-जलौघस्य पश्चात् प्रचलन्त्याः आपदुद्धरण-व्यवस्थायाः समीक्षाम् अकरोत्। सामाजिक-सञ्चारपटले मुख्यमन्त्री डॉ. सरमा न्यवेदयत् यत् अमित शाहः स्थितेः विषये पृष्टवान् सहैव आश्वस्तवान् यत् भारत-सर्वकारः जलौघ-प्रभावितेषु क्षेत्रेषु पुनर्निर्माण-कार्यार्थं आवश्यकं साहाय्यं प्रदास्यति। मुख्यमन्त्रिणा प्रोक्तं यत् सङ्कट-काले केन्द्रीय-सर्वकारस्य सर्वाणि अभिकरणानि संसाधनानि च असम-जनतायाः सेवायां सन्नद्धानि सन्ति ।

# राज्य-सभायां 'वन्दे मातरम्' राष्ट्र-गीताय राष्ट्र-गानवत् समानं वैधानिक-संरक्षणं प्रदातुम् संशोधन विधेयकः पारितः




## लोक-सभायाम् परीक्षा-कदाचार-निवारणार्थं, त्वरित-न्याय-सुनिश्चेतुं च 'सार्वजनिक-परीक्षा संशोधन-विधेयकः पारितः

गृह-राज्यमन्त्री नित्यानन्द-रायः लोक-सभायां 'जन्म-मृत्यु-पञ्जीकरण (संशोधन) विधेयकम्-विंशतिः षड्विंशतिः' प्रास्तावयत् । विधेयकोऽयं नवषष्ट्युत्तरनवदश तम वर्षस्य नियमस्य संशोधनं कर्तुम् ईहते। विधेयके नियमः विहितः यत् यदि कस्यचित् जन्मनः मरणस्य वा सूचना एक-वर्षात् परम् (वर्ष-द्वय-भ्यन्तरे) दीयते, तर्हि कार्यपालक दण्डाधिकारी तस्य अनुमतिं दास्यति। वर्ष-द्वयात् परं तु प्रथम श्रेणी-न्यायिक दण्डाधिकरिनः आदेशेन एव पञ्जीकरणं भविष्यति। अपरतः 'सार्वजनिक परीक्षा (अनुचित-साधन-निवारण) संशोधन विधेयकस्य' चर्चायाम् भागं गृह्णन् लोक-सभायाः प्रतिपक्ष नेता राहुल गान्धी अवोचत् यत् देशे शिक्षा-प्रणाली अतीव व्ययपूर्णा सञ्जाता अस्ति। 'नीट्" परीक्षा सञ्चालने देशस्य शिक्षा-बजेट्-अपेक्षया अधिकं व्ययः भवति इति सः साक्षेपम् आक्षिपत्। सः प्रोक्तवान् यत् छात्र-प्रदर्शनम् हिंसा नैव आसीत्, अपितु यूनां भावना-प्रकटीकरणं आसीत्; सर्वैः दलैः अस्य सम्मानं कर्तव्यम्। विधेयकस्य उपरि अयोजितायाः चर्चायाः प्रत्युत्तरं प्रयच्छन् राज्यमन्त्री डा. जितेन्द्र सिंहः अवदत् यत् एतत् संशोधनं विधानं प्रति अधिक कठोरताम् आनेतुम्, त्वरित-न्यायं च सुनिश्चेतुं आनीतम् अस्ति।
केन्द्रीय-संसदीय-कार्य-मन्त्री किरेण-रिजिजू अवोचत् यत् 'सार्वजनिक-परीक्षा (अनुचित-साधन-निवारण) संशोधन विधेयकम् अधिकृत्य चर्चा-काले काङ्ग्रेस्-सदस्याः विधेयकमधिकृत्य किमपि न उक्तवन्तः, अपितु असम्बद्धान् राजनैतिक-विषयान् एव समुत्थापितवन्तः। सः अवोचत् यत् एतत् संशोधनं छात्राणां चिन्ताः अङ्गीकृत्य तेषामेव माङ्गमधिकृत्य आनीतम् अस्ति। मन्त्री सप्रमाणं प्रोक्तवान् यत् प्रधानमन्त्रिणः एतेन विधेयकानयन-निर्णयेन परीक्षा-प्रणाल्याम् प्रति छात्राणां विश्वासः पुनः सुदृढीभूतो वर्तते।

# झारखण्डस्य मुख्यमन्त्रिणः हेमन्त-सोरेन इत्यस्य त्यागपत्रम् अयाचन्त भारतीय जनता दलस्य सांसदाः



झारखण्ड-राज्यस्य कतिपय-सांसदं समेत्य अनेके भारतीय जनता दलस्य सांसदाः झारखण्ड-लोकसेवा-आयोगस्य परीक्षायाः अनुमानित-प्रश्नपत्र-गोप्यताभंग-प्रकरणम् अधिकृत्य संसदि उग्र-विरोध-प्रदर्शनं व्यधुः । सांसदाः अस्मिन् प्रकरणे 'सी.बी.आई.' संस्थया अन्वेषणस्य याचनां कुर्वन्तः झारखण्डस्य मुख्यमन्त्रिणः हेमन्त-सोरेन इत्यस्य त्यागपत्रम् अयाचन्त। अत्रान्तरे, केन्द्रीय-मन्त्री भाजपा नेता च सञ्जय सेठः अपि अस्य विषयस्य केन्द्रीय-अन्वेषण-ब्यूरो-संस्थया निरीक्षण-परीक्षणं साग्रहं प्रत्यपादयत्। संसद् भवनात् बहिः आकाशवाणी-वार्ताहरैः सह सम्भाषणं कुर्वन् श्रीसेठः अवोचत् यत् काङ्ग्रेस्-दलेन झारखण्ड-मुख्यमन्त्रिणः हेमन्त-सोरेनस्य त्यागपत्रं प्रार्थितव्यम्, झारखण्ड-मुक्ति-मोर्चा-नेतृत्व-युक्तात् राज्य-सर्वकारात् च स्वस्य समर्थनम् निवर्तयितव्यम्।

## सुभाषितम्

आयाच्चतुर्थभागेन,
व्यय कर्म प्रवर्तयेत्।
अन्यूनतैलदीपोऽपि,
चिरं भद्राणि पश्यति।।

भावार्थः- कुल आय के एक चौथाई भाग को अपनी प्रमुख आवश्यकताओं को पूरा करने में व्यय करना चाहिए। अन्य छोटी घरेलू आवश्यकताओं जैसे घर में प्रकाश करने के लिए तैल और दीपक की व्यवस्था आदि के लिए भी कम व्यय करने वाला व्यक्ति चिर काल तक सम्पन्न और सुखी रहता है।

हिमसंस्कृतवार्ता
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सर्वोच्चन्यायालयेन डॉ. मनमोहन-सिङ्घ विरुध्य जायमानं आपराधिक अभियोगं समापितम्

सर्वोच्च न्यायालयेन कृष्णाङ्गारक-आवंटन-प्रकरणे पूर्व-प्रधानमन्त्रिणं डॉ. मनमोहन-सिङ्घ विरुध्य जायमानं आपराधिक अभियोगं समापितम् अनेनैव सह तस्य विरुद्धं निस्सारितः आह्वानादेशः अपि निरस्तीकृतः। मुख्य न्यायाधीशस्य सूर्य-कान्तस्य सहैव न्यायाधीशयोः जॉयमाल्या-बागची, वी. शमोहना इत्येतयोः पीठिकया पूर्व-प्रधानमन्त्रिणे अन्याभियुक्तेभ्यः च शुद्धि-पत्रम् प्रददता केन्द्रीयान्वेषणाभिकरणस्य समापन-प्रतिवेदनम् स्वीकृतम्।

# ओडिशाराज्यं तावत् जलौघस्य आपत्कालस्थित्या सन्तप्यते



ओडिशाराज्यं तावत् जलौघस्य आपत्कालस्थित्या सन्तप्यते। उच्छ्वसितानां नदीनां प्रवाहेण विशालभूभागः जलमग्नायते। येन सहस्रशः जनाः विस्थापिताः अभवन्, अनेकेषु मण्डलेषु च जनजीवनम् अस्तव्यस्तं सञ्जातम्। जलाप्लवस्य विकटस्थितिः दुरापद्यते, अनेन तावत् द्विलक्षाधिकाः जनाः सङ्कटग्रस्ताः, प्रशासनं च पूर्ण-सञ्चेतनायां अध्यास्ते। ओडिशा-राज्यस्य विशेष-सहायता-युक्तस्यानुगुणं अष्टचत्वारिंशदधिक-सप्तशतग्रामेषु त्रिसहस्रोत्तर-द्विलक्षाधिकाः जनाः प्रभाविताः सन्ति। अवधेयमिदं यत् एतावता अष्टाविंशतिसहस्रजनाः सुरक्षित स्थानेषु प्रापिताः। जाजपुर-भद्रक-बालासोर-क्योंझर-जनपदाः सर्वाधिक-प्रभावितेषु जनपदेषु परिगणिताः सन्ति।

# होर्मुज-जलसंधौ सञ्जातस्य

## आक्रमणस्य भारतेन तीव्रा भर्त्सना विहिता, अन्ताराष्ट्रिय-जलमार्गेषु वाणिज्य-सञ्चारः शीघ्रमेव पुनः प्रवर्तनीयः इति प्रतिपादितम्



होर्मुज-जलसंधौ अनेकेषु समुद्रीय-नौकायानेषु सद्यः एव कृतानाम् आक्रमणानां भारतं दृढतया निन्दाम् अकरोत्, अस्मिन् क्षेत्रे वाणिज्यिक-नौवहनस्य, नागरिक-मूलसौकर्याणां च लक्ष्यीकरणं समाप्तं भवेत् इति उक्तवान्। संयुक्तराष्ट्रसङ्घस्य भारतस्य स्थायीप्रतिनिधिः पर्वत-नेनी हरीशः अवदत् यत्, अस्मिन् क्षेत्रे वर्तमानस्य संघर्षस्य अल्पकालस्य विरामानन्तरं, आक्रमणानि पुनरारम्भितानि, शत्रुतायाः वृद्धिः च अभवत्। सः अवदत् यत्, अन्ताराष्ट्रियजलमार्गैः स्वतन्त्रं निर्वाध्यं च नौचालनं, वाणिज्यं च पुनः स्थापनीयम्।

# "मण्डी@५००" धरोहर-अध्ययन-यात्रायै कुलपतिः हरित-ध्वजं प्रदर्श्य प्रस्थानम् अकारयत्





**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदार- पटेल-विश्वविद्यालय- मण्डीनगरस्य इतिहासविभागेन "दीक्षारम्भ" इत्यस्य अन्तर्गतं नवप्रवेशिछात्राणां कृते एकस्य विशेषकार्यक्रमस्य शुभारम्भ-अवसरे विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः प्रो. ललितकुमार अवस्थी मुख्यातिथिरूपेण इतिहासविभागेन आयोजितायाः ऐतिहासिकप्रदर्शिन्याः अवलोकनं कृतवान्। कार्यक्रमस्य अध्यक्षतां छात्र-कल्याण-अधिष्ठाता आचार्यः राजेशकुमारशर्मा अकरोत्। अस्मिन् अवसरे माननीयः कुलपतिः आचार्यः प्रो. ललितकुमार अवस्थी नवप्रवेशिछात्राणां स्वागतं कुर्वन् अवदत् यत् विश्वविद्यालय-जीवनं ज्ञानस्य, संस्कारस्य, व्यक्तित्व-निर्माणस्य च नूतनयात्रायाः प्रारम्भः अस्ति। सः छात्रेभ्यः गुरुपूर्णिमा-पर्वणः शुभकामनाः यच्छन् अकथयत् यत् भारतीयसंस्कृतौ गुरुः केवलं ज्ञानप्रदाता नास्ति, अपि तु जीवनस्य मार्गदर्शकः भवति। सः आह्वानं कृतवान् यत् प्रत्येकं छात्रः स्वरुचिं, क्षमतां, सामाजिक-उत्तरदायित्वं च ध्यात्वा स्पष्टं लक्ष्यं निर्धारयेत्, तत् प्राप्तुं निरन्तर-परिश्रमेण, अनुशासनेन, सकारात्मक-विचारेण च सह अग्रे गच्छेत्। कुलपतिः अवदत् यत् विश्वविद्यालयः छात्राणां समग्र-व्यक्तित्व-विकासाय प्रतियोगी- परीक्षाणां सज्जतायै च शीघ्रम् एव प्रशासनिकसेवा- प्रतियोगीपरीक्षा-सज्जताकेन्द्रं स्थापयितुं कार्यं कुर्वन् अस्ति। सः उक्तवान् यत् इतिहासविभागः छात्राणां कृते कक्षा-शिक्षणेन सह विरासत-अध्ययन- यात्राणां, प्रदर्शिन्याः, शोधगतिविधीनां, सङ्गोष्ठीनां, स्थानीय-इतिहासस्य अध्ययनं सदृशानां नवाचारि-कार्यक्रमाणाम् आयोजनं करोति। अस्मिन् अवसरे सः इतिहास-विभागस्य राज्य- पात्रता- परीक्षायाम् (सेट) उत्तीर्णेभ्यः छात्रेभ्यः, एम.ए. इतिहासतः गौरव रावतः, दीपक-दीपांशुः, विक्रान्तः, कृष्णा देवी च एतान् सम्मानयन् अवदत् यत् छात्राणाम् एषा सफ़लता विश्वविद्यालयस्य गुणवत्तापूर्णशिक्षायाः, शिक्षकाणां समर्पित- मार्गदर्शनस्य, छात्राणां कठोरपरिश्रमस्य च परिणामः अस्ति।

कार्यक्रमस्य अध्यक्षतां कुर्वन् छात्र- कल्याण- अधिष्ठाता आचार्यः प्रो. राजेशकुमारशर्मा अवदत् यत् इतिहासविभागः नवप्रवेशिछात्रेभ्यः याः गतिविधयः आयोजितवान् अस्ति, ताः तान् स्थानीय- इतिहासम्, संस्कृतिं, विरासतं च प्रति संवेदनशीलान् विधास्यन्ति। इतिहास- विभागाध्यक्षः डॉ. राकेशकुमारशर्मा सर्वान् अतिथीन्, इन्टेक-पदाधिकारिणः, छात्रान् च स्वागतीकुर्वन् अवदत् यत् ऐतिहासिक-स्थलानां प्रत्यक्षम् अध्ययनं छात्रेषु शोधपरकदृष्टिं, स्रोतसाम् अवबोधं, सांस्कृतिक-विरासतस्य संरक्षणं च प्रति उत्तरदायित्वं विकासयति। माननीयः कुलपतिः इतिहास-विभागस्य तथा च भारतीय-सांस्कृतिक-निधेः (इन्टेक), मण्डी- अध्यायस्य संयुक्त-तत्त्वावधाने "मण्डी@५००: इतिहासस्य साक्ष्याणि, स्मारकाणि, समाजश्च" इति विषये आयोजिताम् ऐतिहासिक-सांस्कृतिक- धरोहर- अध्ययनयात्रां हरितध्वजं प्रदर्श्य प्रस्थापितवान्। धरोहर-अध्ययन-यात्रायाः अन्तर्गतं छात्राः चौहट्टा, भूतनाथमन्दिरं, विक्टोरिया- केसरीसेतु, पञ्चवक्त्र-महादेवमन्दिरं, नदीतटं, मण्डीनगरस्य ऐतिहासिक- नगर-नियोजनस्य च प्रत्यक्षम् अध्ययनं कृतवन्तः। यात्रायाः अन्तराले इन्टेकपक्षतः सत्य महेशवर्यः प्रत्येकम् ऐतिहासिकस्थलस्य इतिहासम्, स्थापत्यं, सांस्कृतिक-महत्त्वं, संरक्षणस्य आवश्यकतां च अधिकृत्य विस्तारेण सूचनां दत्तवान्। सः छात्रान् सूचितवान् यत् मण्डी-नगरं केवलं मन्दिराणां नगरं नास्ति, अपि तु पञ्च-शताब्दीनां सांस्कृतिक- निरन्तरतायाः, स्थापत्यपरम्परायाः, सामाजिक- विकासस्य च जीवन्तम् उदाहरणम् अस्ति। अस्मिन् अवसरे इन्टेक-मण्डी-अध्यायस्य संयोजकः नरेश मल्होत्रा, सह-संयोजकः अनिल शर्मा, कमलकान्त शर्मा, राजीव वैद्यः, निशि कपूरः, पुष्पा ठाकुरः, हितेश वैद्यः, प्रेम वर्षा चापि उपस्थिताः आसन्। कार्यक्रमे इतिहास- विभागस्य सहायक- आचार्यः विकेश कुमारः, कार्यक्रम- संयोजकः राजेश शर्मा, लोक-प्रशासन-विभागस्य अतिथिसंकायः, शोधार्थी वेदप्रकाशः, दीपक दीपांशुः, लखविन्दरः, मनीषा, वन्दना, भूपेन्द्रः, शिवकुमारः, सुशान्तः, नरेन्द्रः, होमेशः, चिरञ्जीलालः, नवप्रवेशिछात्राः, वरिष्ठछात्राः च महत्यां सङ्ख्यायां विश्वविद्यालय-परिवारस्य सदस्याः उपस्थिताः आसन्। कार्यक्रमस्य समापनं सर्वैः प्रतिभागिभिः मण्डीनगरस्य समृद्ध- ऐतिहासिक- सांस्कृतिक- विरासतस्य संरक्षणस्य सङ्कल्पग्रहणेन सह अभवत्।

# राहुलगान्धी सदनस्य गरिमां पातयित्वा देशं भ्रामयितुं राजनीतिं करोति- अनुरागठाकुरः



हिमसंस्कृतवार्ताः- हमीरपुरम्। संसत्-परिसरे माध्यमैः सह सम्भाषणं कुर्वन् सांसदः अनुरागसिंहठाकुरः काङ्ग्रेसनेतारं राहुलगान्धी-महोदयं प्रति आरोपम् अकरोत् यत् राहुलगान्धी निरन्तरं सदनस्य गरिमायाः संसदीय- नियमानां च अवहेलनां कृत्वा असंसदीय-भाषायाः प्रयोगं करोति, तथ्यैः विना आरोपान् आरोप्य देशं भ्रामयितुं प्रयासम् करोति। तेन उक्तं यत् राहुलगान्धी सदनस्य दुरुपयोगं विधातुं निराधार- आरोपाय च देशस्य युवभ्यः केन्द्रीय-गृह-मन्त्रिणे च सार्वजनिक-रूपेण क्षमा-याचनां कुर्यात्। यदि राहुलगान्धी कस्यापि छात्रस्य कृते मूढः (इडियट) सदृशस्य शब्दस्य प्रयोगं कृतवान्, तर्हि एतत् देशस्य यूनाम् अपमानम् अस्ति अस्य कृते तेन सर्वप्रथमं देशस्य युवभ्यः क्षमा याचितव्या। तेन कथितं यत् यदि राहुलगान्धी एषः शब्दः स्वस्य कृते प्रयुक्तवान् अस्ति, तर्हि अस्मिन् तस्य कापि आपत्तिः नास्ति, अपि तु एतत् आत्मबोधस्य सङ्केतः अस्ति यत् तेन स्वयं स्वस्य वास्तविका स्थितिः स्वीकृता। तेन प्रोक्तं यत् अद्यापि तेन सदनस्य दुरुपयोगं कृत्वा जनतां भ्रामयितुं प्रयासः कृतः, यस्य कृते तेन सदने केन्द्रीय-गृह-मन्त्रिणे अपि क्षमा याचितव्या।

# कर्मचारिणां वरिष्ठता-प्रकरणे हिमाचल- सर्वकाराय सर्वोच्च- न्यायालयात् प्रत्याघातः, विशेष- अनुमति- याचिका (SLP) निरस्ता



**हिमसंस्कृतवार्ताः- शिमला**।सर्वोच्च- न्यायालयेन हिमाचलप्रदेश- उच्च- न्यायालयस्य तं निर्णयं स्थिरीकृतम् यस्मिन् राज्यसर्वकारस्य पक्षतः २०२४ तमे वर्षे पारितं 'हिमाचलप्रदेश- सरकारी- कर्मचारी (भर्ती- सेवा- नियमाः) अधिनियमम्' पूर्णतया अस्वीकृत्य निरस्तं कृतम् आसीत्। सर्वोच्च-न्यायालयस्य न्यायाधीशस्य विक्रमनाथस्य न्यायाधीशस्य संदीपमेहतायाश्च खण्डपीठेन स्पष्टीकृतं यत् सा उच्चन्यायालयस्य निर्णये हस्तक्षेपं कर्तुं न इच्छति। यद्यपि, राज्यसर्वकारस्य पक्षतः उपस्थितस्य महाधिवक्तुः अनुरोधे सर्वोच्च-न्यायालयेन साहाय्यतां यच्छता उच्चन्यायालयस्य आदेशानाम् अनुपालनाय ४ मासानाम् अतिरिक्तः समयः प्रदत्तम्। शीर्ष-न्यायालयस्य अस्य निर्णयस्य परं प्रदेशसर्वकाराय अधुना सर्वथा कर्मचारिणां वरिष्ठता, अवशिष्टांशः, आर्थिकलाभाश्च प्रसारणीयाः भविष्यन्ति।उल्लेखनीयम् अस्ति यत् उच्चन्यायालयस्य न्यायाधीशस्य विवेकसिंहठाकुरस्य न्यायाधीशस्य रोमेशवर्मणश्च खण्डपीठेन २५ अप्रैल २०२६ दिनाङ्के राज्यसर्वकारस्य एतं अधिनियमम् असंवैधानिकं घोषयित्वा पूर्णतया निरस्तं कृतम् आसीत्। उच्चन्यायालयस्य अस्य निर्णयस्य विरुद्धं प्रदेशसर्वकारेण सर्वोच्च-न्यायालये एस.एल.पी. पञ्जीकृता आसीत्। परन्तु ततः अपि प्रदेशसर्वकाराय काऽपि साहाय्यता न प्राप्ता। हिमाचलप्रदेश- उच्चन्यायालये कर्मचारिभिः सम्बद्धाः सहस्रशः विषयाः (मामले) प्रतिदिनं श्रवणाय लगन्ति। हिमाचलप्रदेश-उच्चन्यायालयः अस्य नियमस्य आधारे कर्मचारिभ्यः दीयमानान् लाभान् प्रत्याहर्तुं, वरिष्ठतां हर्तुं न्यूनतां वा कर्तुं सम्बद्धान् सर्वान् सर्वकारीय-निर्णयान् अस्वीकृतिपत्राणि च निरस्तवान्।

## उच्चन्यायालयेन सक्षमेभ्यः अधिकारिभ्यः ३ मासाभ्यन्तरे सेवा-लाभान् प्रदातुं दत्तः आदेशः

उच्चन्यायालयेन सक्षमेभ्यः अधिकारिभ्यः आदेशः दत्तः आसीत् यत् ते न्यायिक-निर्णयानां संवैधानिक-प्रावधानानां च अन्तर्गतं पात्रेभ्यः कर्मचारिभ्यः ३ मासाभ्यन्तरे तेषां सेवा-लाभान् प्रयच्छन्तु। उच्चन्यायालयेन स्वकीये ऐतिहासिकनिर्णये स्पष्टीकृतं यत् राज्य- विधानमण्डलस्य पार्श्वे न्यायालयैः दत्तान् निर्णयान् परिवर्तयितुं प्रभावहीनान् वा विधातुं कश्चिद् अधिकारः नास्ति। उच्चन्यायालयः एतं नियमं शक्तीनाम् पृथक्कीकरणस्य, नियमस्य शासनस्य तथा च संविधानस्य १४ १६ च अनुच्छेदयोः (समानतायाः अधिकारः) उल्लङ्घनं मेने। न्यायालयेन टिप्पणीं कुर्वता प्रोक्तं यत् सर्वकारेण न्यायालयानाम् ऐतिहासिक-निर्णयान् (यथा ताज- मोहम्मद- प्रकरणम्) प्रभावहीनान् विधातुं नियमं रचयित्वा न्यायिक-शक्तिषु अतिक्रमणं कृतम्।संविधानस्य ३०९ अनुच्छेदाय राज्यं लोकसेवानां नियमान् रचयितुं शक्तिं यच्छति, परन्तु तादृशं किमपि नियमं रचयितुम् अनुमतिं न यच्छति यत् संवैधानिक-संरचनायाः न्यायिक-आदेशानां च विपरीतं भवेत्। उच्चन्यायालयेन रेखाङ्कितं यत् राज्यसर्वकारेण १२ दिसम्बर २००३ दिनाङ्कात् पूर्वं नियुक्तेभ्यः अनुबन्ध-कर्मचारिभ्यः न्यायालयस्य आदेशानाम् अन्तर्गतं लाभाः दत्ताः, यदा च १२ दिसम्बर २००३ दिनाङ्कात् परं आर-एण्ड-पी नियमानाम् अन्तर्गतं पूर्ण- पारदर्शक-प्रक्रियया चिह्नितेभ्यः कर्मचारिभ्यः लाभेभ्यः वञ्चितं कर्तुं प्रयासः कृतः। एषा द्विमुखी नीतिः १४ अनुच्छेदस्य प्रत्यक्षम् उल्लङ्घनम् ऐच्छिकं च पदम् अस्ति।

# जयरामठाकुरस्य सुक्खु-सर्वकारस्य उपरि प्रहारः, 'नियुक्ति; एवं सेवा नियमाः, नियमे सर्वोच्च- न्यायालयस्य निर्णयस्य कृतं स्वागतम्




**हिमसंस्कृतवार्ताः- शिमला**। नियुक्तिः एवं सेवा शर्ताः नियमः-२०२४ इति आदाय सर्वोच्च-न्यायालयस्य निर्णयात् परं प्रतिपक्षनेता पूर्वमुख्यमन्त्री च जयरामठाकुरः प्रदेशसर्वकारस्य उपरि तीक्ष्णम् आक्रमणम् अकरोत्। शिमलातः प्रसारिते वक्तव्ये तेन उक्तं यत् सर्वोच्च-न्यायालयस्य पक्षतः राज्यसर्वकारस्य विशेष- अनुमति-याचिकायाः निरसनं सुक्खुसर्वकारस्य "असंवैधानिकनीतेः" उपरि कठोरम् उत्तरम् अस्ति।जयरामठाकुरेण प्रोक्तं यत् इतः पूर्वं हिमाचलप्रदेश- उच्चन्यायालयः अपि एतं नियमं निरस्तवान् आसीत्। एतस्य निर्णये सत्यपि राज्यसर्वकारेण सर्वोच्च-न्यायालये आह्वानं दत्तम्, परन्तु तत्रापि तस्मै कापि साहाय्यता न प्राप्ता। तेन कथितं यत् सर्वकारः कर्मचारिणां हितैषी इति पक्षं करोति, यदा च तस्य निर्णयाः कर्मचारिणाम् अधिकारान् प्रभावितान् कुर्वन्तः सन्ति।
तेन आरोपः कृतः यत् सर्वकारेण 'भर्ती एवं सेवा शर्ताः' नियमम् आनीय कर्मचारिणां वरिष्ठतायाः आर्थिकलाभानां च सम्बद्धानि उत्तरदायित्वाणि भविष्यस्य सर्वकारेषु स्थापयितुं प्रयासः कृतः। भाजपादलेन विधानसभायाम् अपि अस्य विधेयकस्य विरोधः कृतः आसीत् एतत् असंवैधानिकम् इति प्रोक्तम् आसीत्।

## सर्वकारस्य अन्येषु निर्णयेषु अपि उत्थापिताः प्रश्नाः

प्रतिपक्षनेत्रा कथितं यत् एषः प्रथमः अवसरः नास्ति यदा राज्यसर्वकारस्य कस्यापि निर्णयस्य उपरि न्यायालयेन आपत्तिः प्रकटीकृता स्यात्। तेन पक्षः कृतः यत् इतः पूर्वं विद्रोही-विधायकानां पेंशन-सम्बद्धेषु नियमेषु, जल-आयोगे, मुख्य- संसदीय-सचिवस्य नियुक्तिषु, विद्युत्-दरेषु पञ्चायत-निर्वाचनेषु च सम्बद्धेषु प्रकरणेषु अपि सर्वकाराय न्यायालयेषु प्रत्याघातः प्राप्तः। तेन आरोपः कृतः यत् एतेषां प्रकरणानां विधि-युद्धे सर्वकारीधनस्य व्यापकः उपयोगः अभवत्।

## 'सर्वस्मिन् विषये भाजपादलाय दोषप्रदानं मुख्यमन्त्रिणः अभ्यासः'

जयरामठाकुरेण मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खु महोदयं प्रति लक्ष्यं कुर्वता कथितं यत् सर्वकारः स्वस्य प्रत्येकं विफलतायै भाजपा-दलं उत्तरदायिनं विधातुं प्रयासम् करोति। तेन प्रोक्तं यत् मुख्यमन्त्रिणः सम्पत्तिम् आदाय सम्मुखम् आगता सूचना कस्यापि स्वतन्त्र-संस्थया सार्वजनिक-विवरणानाम् आधारेण निर्मिता आसीत् तस्याः च भाजपादलेन सह कश्चिद् सम्बन्धः नास्ति।

# त्रिषु वर्षेषु खनिजेभ्यः प्राप्ते राजस्वे ७०% वृद्धिः, मुख्यमंत्रिणा सुक्खुना अवैधखनने शून्य- सहनशीलतायै निर्देशाः दत्ताः

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे गतेषु त्रिषु वर्षेषु खनिजानां दोहनेन प्राप्यमाणे राजस्वे प्रायः ७० प्रतिशतं यावत् वृद्धिः अभिलिखिता। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खु महोदयेन बुधवासरे राज्यसचिवालये उद्योगविभागस्य अन्तर्गतं खननपक्षस्य कार्याणां समीक्षा कृता। अस्मिन् अवसरे तेन राजस्वस्य विवरणेषु सन्तोषं प्रकटयता अवैध-खननस्य पर्यावरणसंरक्षणस्य च विषये अधिकारिभ्यः कठोराः दिशानिर्देशाः प्रसारिताः। अस्यां उच्चस्तरीय- समीक्षा- उपवेशने उद्योगमन्त्री हर्षवर्धनचौहानः, प्रधानसचिवा एम. सुधादेवी, पर्यावरणविज्ञान- प्रविधि- जलवायुपरिवर्तन- सचिवः डॉ. सुशीलकुमारसिंगला, उद्योगनिदेशकः विवेकभाटिया, हिमकोस्ट-संस्थायाः संयुक्त- सदस्य-सचिवः डॉ. सुरेशचन्द अत्री इत्येतेषां सह अनेके अन्ये वरिष्ठ-अधिकारिणः उपस्थिताः आसन्।

## खनन-राजस्वं २०० कोटितः वर्धित्वा ३४० कोटिरूप्यकाणि प्राप्तम्

मुख्यमन्त्रिणा समीक्षा-उपवेशने विवरणानि प्रकटीकुर्वता ज्ञापितं यत् राज्ये खनन- गतिविधिभिः आयमाने आय-राशौ महती वृद्धिः अभवत्। वित्तवर्षे २०२१-२२ मध्ये मुख्य- लघु- खनिजेभ्यः प्रदेशाय २०० कोटिरूप्यकाणां राजस्वं प्राप्तम् आसीत्। तत्रैव, अधुना २०२५-२६ वर्षस्य कृते एतद् अङ्कं वर्धित्वा ३४० कोटिरूप्यकाणि यावत् प्राप्तः अस्ति, यत् राज्यस्य अर्थव्यवस्थायाः कृते एकं सकारात्मकं पदम् अस्ति।

## प्रतिवेशि-राज्यैः आरोपिते कर-विषये प्रकटीकृता चिन्ता

राजस्वे वृद्धेः अनन्तरम् अपि, मुख्यमन्त्रिणा सीमावर्ती-राज्यानां नीतिषु चिन्ता प्रकटीकृता। तेन प्रोक्तं यत् प्रतिवेशि-राज्यानि पञ्जाब- हरियाणा- उत्तराखण्ड-प्रभृतयः हिमाचलात् गच्छत्सु लघु- खनिजेषु अतिरिक्तं शुल्कम् आरोपितवन्तः। अस्य कारणेन प्रदेशस्य सीमावर्ती- क्षेत्रेभ्यः खनिजानाम् निर्याते न्यूनीकरणं जातं राजस्वप्राप्तिश्च प्रभाविता अभवत्। मुख्यमंत्रीमहोदयेन अधिकारिणः निर्दिष्टाः यत् एषः विषयः प्रतिवेशिराज्यैः सह विधिवत् उत्थापनीयः।

## केन्द्रसर्वकारात् उत्थापयिष्यते सुधा- प्रस्तरस्य 'रॉयल्टी' विषयः

मुख्यमन्त्रिणा सुक्खु-महोदयेन केन्द्रसर्वकारस्य नीतीनां चर्चां कुर्वन् प्रोक्तं यत् २०१४ वर्षात् केन्द्रसर्वकारेण सुधा-प्रस्तरस्य 'रॉयल्टी' दरेषु किमपि संशोधनं न कृतम्। अस्मात् कारणात् राज्यस्य राजस्वे विपरीत-प्रभावः पतन् अस्ति। तेन स्पष्टीकृतं यत् हिमाचलं स्वकीयम् उचितम् अधिकारं प्राप्तुम् अस्य विषयस्य केन्द्रसर्वकारस्य सम्मुखे प्रमुखतया उत्थापनं करिष्यति।

## पर्यावरणसंरक्षणेन सह भविष्यति वैज्ञानिकं खननम्

मुख्यमन्त्रिणा स्पष्टीकृतं यत् विकासः पर्यावरण-संरक्षणं च द्वे अपि सह-सह प्रवर्तेताम्। तेन सम्बद्ध-विभागाः निर्दिष्टाः यत् प्रदेशे खनिजानां दोहनं वैज्ञानिक-पर्यावरणानुकूल- विधिना एव सुनिश्चितं क्रियेत।

# ऊनाजनपदे डोहगीस्थे सनातनधर्म-आदर्शसंस्कृत-महाविद्यालये गुरुपूर्णिमा-महोत्सवस्य भव्यायोजनम्





**हिमसंस्कृतवार्ता, ऊना।** सनातनधर्म-आदर्शसंस्कृतमहाविद्यालये, डोहग्यां गुरुपूर्णिमायाः पावनः महोत्सवः श्रद्धाभक्तिपूर्णे गरिममये च वातावरणे सुसम्पन्नः । कार्यक्रमस्य शुभारम्भः महाविद्यालयस्य छात्रैः नेहा-दिव्यांशु-इत्यादिभिः सर्वेषां गुरूणां तिलकधारणपूर्वकं विहितः । ततःपरं कार्यक्रमस्य अध्यक्षेन महाविद्यालयस्य प्राचार्येण प्रो. लालसिंहपठानियामहोदयेन वरिष्ठाचार्यैश्च दीपप्रज्वालनं कृत्वा कार्यक्रमस्य औपचारिकः शुभारम्भः कृतः । वैदिकमङ्गलाचरणं वेदविभागस्य आचार्येण डा. महेशशर्मणा तथा वैदिकछात्रेण निशान्तेन अन्यैश्च वैदिकविद्यार्थिभिः विहितम् । कार्यक्रमे समुपस्थितानां सर्वेषामतिथीनां स्वागतं सम्मानं च महाविद्यालयस्य छात्राभ्याम् आर्यनशर्मणा सचिनशर्मणा च कृतम् । महाविद्यालयस्य छात्राभिः पूजा-शिखा-अञ्जलि-सुहानीभिः स्वागतगीतस्य माध्यमेन सर्वेषां गुरुजनानामभिनन्दनं कृतम् । अस्मिन्नवसरे विद्यार्थिभिः गुरुमहिम्नः सम्बन्धीनि प्रेरणादायकानि विचारप्रस्तावनानि, भाषणानि, कवितापाठाः तथा सांस्कृतिककार्यक्रमाश्च प्रस्तुताः, येषां सर्वैः मुक्तकण्ठेन प्रशंसा कृता। शास्त्री-द्वितीयवर्षस्य छात्र्यः रिधम, नैन्सी तथा सिमरन भाषणैः, अभिलाषाशर्मा तथा काजल गीत-कविताभ्यां, राघवशर्मा च मङ्गलश्लोकपाठेन गुरुवन्दनां कृतवान् । कार्यक्रमस्य समन्वयकः मुख्यवक्ता च आचार्यः डा. नरेन्द्रकुमारः गुरुपूर्णिमायाः ऐतिहासिकं दार्शनिकं सांस्कृतिकं च महत्त्वं विशदीकृत्य महर्षेः वेदव्यासस्य अद्वितीयं योगदानं स्मारितवान्। तेन उक्तं यत् गुरवः भारतीयज्ञानपरम्परायाः संवाहकाः सन्ति, तेषां मार्गदर्शनेन एव समाजे ज्ञानस्य, संस्काराणां नैतिकमूल्यानां च संरक्षणं सम्भवति । स्वकीयवक्तव्ये तेन स्वामीविवेकानन्दस्य, स्वामीदयानन्दस्य च उदाहरणैः गुरोर्वैभवं सुस्पष्टतया प्रतिपादितम् । महाविद्यालयस्य वरिष्ठाचार्यः डा. केदारदत्तपुरोहितः शास्त्रेषु वर्णितानां “नमोऽस्तु ते व्यासविशालबुद्धे” इत्यादीनां श्लोकानामाधारेण महर्षेः वेदव्यासस्य संस्कृतभाषायाः भारतीयसंस्कृतेश्च उन्नयने योगदानं विवृण्वन् गुरोः सम्बन्धिनां बहूनां श्लोकानां यथार्थभावं श्रोतृभ्यः सम्यक् निरूपितवान् । कार्यक्रमस्य अध्यक्षः महाविद्यालयस्य प्राचार्यः प्रो. लालसिंहपठानियामहोदयः स्वीये अध्यक्षीयोद्बोधने अवदत् यत् भारतीयसंस्कृतौ गुरोः स्थानं सर्वोच्चम् अस्ति। गुरुः केवलं ज्ञानं न ददाति, अपितु शिष्यस्य व्यक्तित्वनिर्माणं कृत्वा तं संस्कारितजीवनस्य मार्गे प्रेरयति । गुरौ श्रद्धा, विनयः, समर्पणभावश्च विद्यार्थीजीवनस्य वास्तविकसफलतायाः मूलाधारः इति प्रतिपादयन् प्रो. पठानियामहोदयः स्वकीयकवितया विद्यार्थिनः गुरुजनानां प्रति सम्मानम्, अनुशासनं समर्पणभावं च निरन्तरं धारयितुमाह्वानम् अकरोत् । कार्यक्रमस्य संयोजनं ज्योतिषविभागस्य आचार्येण डा. मुकेशकुमारेण कृतम् । मञ्चसञ्चालनं शास्त्रीकक्षायाः छात्राभ्यां श्रीसुधांशुना सुश्रीतमन्नया च कुशलतया विहितम् । कार्यक्रमस्य समापनकाले महाविद्यालयस्य राष्ट्रियसेवायोजनायाः (एन.एस.एस.) स्वयंसेवकविद्यार्थिभिः सत्यम् सरोचः, अंशुलभट्टः, मनीषः, अनीकेतः, शुभम्, संजु इत्यादिभिः प्रसादवितरणं कृतम् । अस्मिन्नवसरे महाविद्यालयस्य आचार्याः डा. राजिन्द्रकुमारशर्मा, डा. रविदत्तशर्मा, डा. कृष्णादेवी, श्री रविकन्यालः, श्री विपिनपटियालः, डा. बिक्रमबाद्यकरः, डा. अरुणादेवी, डा. महेशशर्मा, सुश्री अनीता, श्रीमती कपिलापुरोहिता, श्रीमती अञ्जु, श्रीमती पूजा, श्री विजयः, श्री राजेशः, श्रीमती रीता तथा अन्ये प्राध्यापकाः कर्मचारीवर्गश्च सादरमुपस्थिताः आसन्

# अमतर-बेला-ग्रामस्य कुमकुम-महोदया संस्कृते कीर्तिमानं रचितवती, प्रथम-प्रयासे एव सेट-परीक्षा उत्तीर्णा

## संस्कृतसाधनायाः, परिश्रमस्य, प्रतिभायाः च उत्कृष्टम् उदाहरणं सञ्जाता कुमकुम



**प्रथमप्रयासे एचपी- सेट- परीक्षाम् उत्तीर्णवती प्रतिभाशालिनी छात्रा कुमकुम, या संस्कृतविषये निरन्तरम् उत्कृष्ट-उपलब्धीः प्राप्य क्षेत्रं गौरवान्वितं कृतवती।**

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, नादौनम्।** नादौननगरस्य समीपे अटल-बिहारी- वाजपेयी- क्रिकेट-क्रीडाङ्गणस्य (अमतर-बेला) ग्रामस्य निवासिनी प्रतिभाशालिनी छात्रा कुमकुम प्रथमप्रयासे एव राज्य-पात्रता-परीक्षाम् (SET- २०२६) उत्तीर्य क्षेत्रं, मातापितरौ, गुरून् संस्कृतजगत् गौरवान्वितं कृतवती। विशेषवार्ता अस्ति यत् विज्ञानसङ्कायात् शिक्षायाः आरम्भं कृत्वा अपि कुमकुम संस्कृतविषयं स्वीकृत्य अल्पसमये एव उल्लेखनीय-उपलब्धीः अर्जितवती।कुमकुम २०२१ तमे वर्षे राजकीय- उत्कृष्ट- कन्या- वरिष्ठ-माध्यमिक- विद्यालय- नादौनात् १०+२ (नॉन-मेडिकल) उत्तीर्णा। विद्यालये अध्ययनकाले संस्कृतं प्रति तस्याः रुचिः विकसिता, संस्कृत-अध्यापकात् आचार्य- नरेशमलोटिया-महोदयात् च प्रेरिता भूत्वा सा संस्कृतं स्व-उच्च-अध्ययनस्य आधारं विहितवती। तदुपरान्तं सा सनातन- धर्म- संस्कृत-महाविद्यालय- डोहगीतः २०२४ तमे वर्षे शास्त्रीपरीक्षां प्रायः ९१.२९ प्रतिशतम् (२८३०/ ३१००) अङ्कैः सह उत्तीर्णवती। केवलं वर्ष-त्रयस्य अन्तः संस्कृतविषये तस्याः एषा उपलब्धिः तस्याः प्रतिभायाः, परिश्रमस्य, समर्पणस्य च परिचायिका अस्ति।अस्मिन् एव वर्षे कुमकुम-महोदया एचपी-टेट (संस्कृत) परीक्षायां १५०-तः १४६ अङ्कान् प्राप्य सफ़लताम् अर्जितवती, या स्वयम् एका असाधारणा उपलब्धिः मन्यते। वर्तमाने सा हिमाचलप्रदेश- विश्वविद्यालय- शिमलातः संस्कृतविषये एम.ए. अन्तिमवर्षस्य छात्रा अस्ति, स्व-अन्तिम-परीक्षां च ददाति। अस्मिन् एव अन्तराले सा सेट-२०२६ परीक्षाम् अपि उत्तीर्य एकाम् अन्यां महत्त्वपूर्णाम् उपलब्धिं स्व-नाम्नि अकरोत्।

### साधारण-परिवारस्य असाधारणा उपलब्धिः

कुमकुम-महोदयायाः पिता तरसेमसिंहः वृत्त्या चालकः अस्ति, माता सुषमादेवी च गृहिणी अस्ति। एकस्मात् साधारण-परिवारात् सम्बद्धमाना कुमकुम स्व-परिश्रमस्य, निष्ठायाः, प्रतिभायाः च बलेन एतां सफ़लताम् अर्जितवती। तस्याः अस्याम् उपलब्धौ परिवारे, बन्धुषु, क्षेत्रस्य जनेषु च हर्षस्य वातावरणम् अस्ति। तस्याः परिश्रमाय, गुरूणां मार्गदर्शनाय, ईश्वरस्य कृपायै च दत्तवान्।

### संस्कृतं प्रति समर्पणं प्रायच्छत् सफ़लताम्- आचार्यः नरेश मलोटिया

कुमकुम-महोदयायाः संस्कृत-अध्यापकः आचार्यः नरेश मलोटिया तस्याः सफ़लतायां प्रसन्नतां प्रकटयन् अवदत् यत् कुमकुम षष्ठी-कक्षातत: दशमीकक्षां यावत् अत्यन्तम् अनुशासिता, विनम्रा, परिश्रमिणी, मेधाविनी च छात्रा आसीत्। सः सूचितवान् यत् कुमकुम न केवलं संस्कृते, अपि तु सर्वेषु विषयेषु सर्वदा उत्कृष्टं प्रदर्शनं कृतवती। संस्कृतविषयं स्वीकृत्य सा एतत् सिद्धं कृतवती यत् यदि दृढ-निश्चयः परिश्रमश्च भवेत् तर्हि कस्मिन् अपि क्षेत्रे उच्चतमाः उपलब्धयः प्राप्तुं शक्यन्ते। सः अवदत् यत् कुमकुम-महोदयायाः एषा सफ़लता संस्कृतं प्रति यूनां वर्धमानायाः रुचेः अपि प्रमाणम् अस्ति। सः विश्वसिति यत् कुमकुम-महोदया भविष्ये संस्कृतभाषायाः, भारतीय- ज्ञान-परम्परायाः, सनातनसंस्कृतेः च प्रचारप्रसारे महत्त्वपूर्णं योगदानं दत्त्वा न केवलं नादौन- हमीरपुरयोः, अपि तु समग्र-हिमाचलप्रदेशस्य देशस्य च नाम आलोकितं करिष्यति। सः कुमकुम-महोदयायाः मातापितरौ सम्मिलितं कृत्वा समस्त-परिवारजनाय गुरुजनाय च शुभकामनाः प्रदत्तवान्।

### विश्वविद्यालयस्य परीक्षातिथेः कारणात् न दातुं शक्तवती नेट-२०२६-परीक्षाम्

कुमकुम राष्ट्रिय-पात्रता-परीक्षायै (NET) अपि आवेदनं कृतवती आसीत्, किन्तु एम.ए. अन्तिमवर्षस्य विश्वविद्यालय-परीक्षायाः, नेट-परीक्षायाः च तिथिः एकस्मिन् एव दिने आसीत् अतः सा नेट-परीक्षायां सम्मलिता भवितुं न शक्तवती। परिवारस्य शिक्षकस्य च एतद् मतम् अस्ति यत् यदि सा परीक्षां दातुम् अवसरं प्राप्नुयात् तर्हि सा तस्याम् अपि उत्कृष्टं प्रदर्शनं कृत्वा सफ़लतां प्राप्नुयात्। शिमला-विश्वविद्यालयस्य प्रमादस्य कारणात् सा नेट-परीक्षां दातुम् असफ़ला अभवत्।

# ग्रीनफील्ड-सैटेलाइट-नगरक्षेत्रेषु भूमेः क्रय-विक्रययोः हस्तान्तरणस्य च मार्गः भविष्यति प्रशस्तः



## विकासयोजनायाः अन्तिमप्रकाशनात् परम् अपसरिष्यति प्रतिबन्धः, सुनियोजित-नागरिक-विकासाय लप्स्यते गतिः

हिमसंस्कृतवार्ता राघव नाथ झा। राज्यसर्वकारेण ग्रीनफील्ड-सैटेलाइट-नगरक्षेत्राणां सुनियोजित-सन्तुलित-विकासस्य दिशि एकः महत्त्वपूर्णः निर्णयः गृहीतः। सक्षमप्राधिकारस्य अनुमोदनात् परम् अधिसूचितेषु ग्रीनफील्ड-सैटेलाइट-नगरक्षेत्रेषु भूमेः क्रय-विक्रययोः हस्तान्तरणे च आरोपितः प्रतिबन्धः विकासयोजनायाः अन्तिमप्रकाशनात् परम् अपसारयितुं निर्णयः कृतः। अनेन सर्वसाधारणेभ्यः नागरिकेभ्यः, भूस्वामिभ्यः, निवेशकेभ्यः च महती राहतः (आश्वासः) लप्स्यते, सैटेलाइट-नगराणां विकासाय च नवीना गतिः प्राप्स्यते। ज्ञातव्यमस्ति यत् नगरविकास-आवासविभागेन राज्यस्य ११ ग्रीनफील्ड-सैटेलाइट-नगरक्षेत्रेषु 'मास्टर प्लान' (पटनाक्षेत्राय 'जोनल प्लान') अधिसूचनं यावत् भूमेः क्रय-विक्रये, हस्तान्तरणे, भूमिविकासे तथा भवन निर्माणे च प्रतिबन्धः आरोपितः आसीत्। ततः परम् भूस्वामिनां आवश्यकताः ध्याने निधाय १९ जून २०२६ दिनाङ्कस्य विभागीयसङ्कल्पेन 'बिहार राज्य आवास बोर्ड' इति संस्था भूस्वामिभ्यः भूमिं क्रेतुं अधिकृता कृता।

सम्प्रति राज्यसर्वकारः एतेषां सैटेलाइट-नगराणां 'मास्टर प्लान' इत्यस्य अन्तिमरूपेण सह-सह विकासयोजनां (डेवलपमेंट प्लान) निर्मातुं कार्यं प्राथमिकतापूर्वकं करोति। विकासयोजनायाः अन्तिमप्रकाशनात् परं भूमिउपयोगः, आधारभूतसंरचना, सार्वजनिकस्थलानां विकासः, भवननिर्माणसम्बद्धाः च सर्वाः गतिविधयः सुव्यवस्थितरूपेण सञ्चालिताः भविष्यन्ति।

प्रस्तावितः 'बिहार नगर विकास प्राधिकरणः' विकासयोजनायाः तथा विकासनियन्त्रणविनियमनस्य (DCR) अनुरूपं भूमिविकासस्य भवननिर्माणगतिविधीनां च नियमनं करिष्यति। अनेन सह एव, विकासयोजनायाः प्रवर्तनेन सह सर्वकारेण भू-अर्जनम्, भूमिक्रयः, 'लैंड पुलिंग' इत्यादयाः प्रक्रियाः अपि प्रारप्स्यन्ते। एतस्मात् कारणात् भूमेः क्रय-विक्रययोः हस्तान्तरणे च आरोपितस्य प्रतिबन्धस्य अपसारणेन सैटेलाइट-नगराणां विकासे कापि बाधा न उत्पत्स्यते।

निर्णयानुगुणं अधिसूचितेषु ग्रीनफील्ड-सैटेलाइट-नगरेषु विकासयोजनायाः अन्तिमप्रकाशनात् परं भूमेः क्रय-विक्रययोः हस्तान्तरणे च स्थितः प्रतिबन्धः समाप्तः भविष्यति। यदि प्रारूप-विकासयोजनायाः प्रकाशनात् परम् इदं ज्ञायते यत् प्रतिबन्धस्यापसारणेन विकासकार्येषु कापि व्यावहारिकबाधा न आगमिष्यति, तर्हि 'बिहार नगर विकास प्राधिकरणः' अन्तिमप्रकाशनात् पूर्वमपि अस्मिन् विषये आवश्यकं निर्णयं ग्रहीतुं शक्ष्यति।

राज्यसर्वकारस्य एषः निर्णयः सुनियोजित-नगरीकरणाय, पारदर्शिने भूमिसञ्चालनाय, आधुनिक-आधारभूतसंरचनायाः विकासाय च महत्त्वपूर्णं पदमस्ति। अनेन भूस्वामिनां हितानां रक्षणेन सह निवेशाय प्रोत्साहनं लप्स्यते, बिहारस्य प्रस्तावित-सैटेलाइट-नगराणां समग्रः सततश्च विकासमार्गः अधिकं सुगमः भविष्यति।

## के.सी.ई. संस्थया सञ्चालिते ज्ञानज्योत् स्पर्धापरीक्षा- केन्द्रे गुरुपूर्णिमोत्सवः सम्यक् सम्पन्नः





जलगांवनगरे के.सी.ई. संस्थया सञ्चालिते ज्ञानज्योत् स्पर्धापरीक्षा-केन्द्रे गुरुपूर्णिमोत्सवः अत्यन्तं हर्षोल्लासेन भक्तिभावेन च सम्पन्नः। एकादश-द्वादशकक्षयोः अध्ययनरतैः छात्रैः गुरुपूर्णिमायाः पावनावसरे स्वगुरूणां प्रति कृतज्ञताभावः सादरं प्रकटितः।कार्यक्रमस्य प्रारम्भे छात्रैः सर्वेभ्यः गुरुज नेभ्यः सादरं प्रणामः कृतः, पुष्पगुच्छाः समर्पिताः, ततः गुरुपूर्णिमोत्सवानिमित्तं केकस्य छेदनं कृत्वा सर्वैः सह हर्षेण उत्सवः समाचरितः।

विद्यार्थिभिः स्वमनोगतेषु उक्तं यत्- "गुरवः अस्माकं जीवने ज्ञानस्य प्रकाशं वितरन्ति, सन्मार्गं दर्शयन्ति, ध्येयप्राप्तये प्रेरयन्ति च। तेषां अमूल्यं मार्गदर्शनम् अस्माकं जीवनस्य अमूल्यं धनम् अस्ति।" इति। एतादृशैः भावपूर्णैः वचनैः छात्रैः स्वगुरूणां प्रति हार्दिकी कृतज्ञता निवेदिता।

अस्मिन् अवसरे केन्द्रस्य अध्ययन-अध्यापनकार्ये संलग्नाः सर्वे अध्यापकाः उपस्थिताः आसन्। अध्यापकैरपि विद्यार्थिनां गुरुभक्तिं, विनयं, कृतज्ञतां च प्रशंस्य, तेषां उज्ज्वलभविष्यस्य कामना कृता। ते छात्रान् आशीर्वादयन् अवदन् यत्- परिश्रमेण, अनुशासनेन, सदाचारेण च जीवने सर्वदा सफलता प्राप्यताम्।एवं गुरु-शिष्यपरम्परायाः गौरवं वर्धयन् अयं गुरुपूर्णिमोत्सवः सौहार्दपूर्णे, प्रेरणादायके, भक्तिमये च वातावरणे सफलतया सम्पन्नः।

# व्यक्तित्वनिर्माणे गुरोः योगदानम् इति विषये व्याख्यानगोष्ठी, संस्कृतगुरूणां सम्मानश्च






**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।** लखनऊस्थितेन उत्तरप्रदेश- संस्कृतसंस्थानेन गुरुपूर्णिमापर्वणः पावनावसरे "व्यक्तित्वनिर्माणे गुरोः योगदानम्" इति विषये व्याख्यानगोष्ठ्याः आयोजनं कृत्वा प्रदेशस्य विभिन्नजनपदेभ्यः समागतानां संस्कृतविद्यालय- महाविद्यालयेषु सेवानिवृत्तानां संस्कृतशिक्षकाणां संस्कृत- सेवाव्रतीनां च सम्मानसमारोहः समायोजितः।कार्यक्रमस्य शुभारम्भः दीपप्रज्ज्वलनेन माल्यार्पणेन च अभवत्। ततः अतिथीनां स्वागतं विधाय व्याख्यानगोष्ठी प्रारब्धा। संस्कृतविद्वान् प्रो. आजादमिश्रः गुरुतत्त्वस्य महत्त्वं प्रतिपादयन् अवदत् यत् शास्त्रेषु पञ्चविधानां गुरूणां वर्णनं विद्यते- मातापितरौ, आचार्यः, संस्कारदाता गुरुः, सद्गुरुः, परमगुरुश्च। व्यक्तित्वनिर्माणे, संस्कारविकासे तथा जीवनस्य सम्यग्दिशानिर्देशे गुरोः स्थानम् अनन्यमिति तेन प्रतिपादितम्। तेन गुरु-शिष्यपरम्परायाः मूलाधारत्वेन सदाचारः, विनयः, संस्काराः, समर्पणभावश्च निरूपिताः।

संस्कृतविद्वान् प्रो. सुरेन्द्रपाठकः महर्षेः वेदव्यासस्य व्यक्तित्वकृतित्वयोः विवेचनं कुर्वन् अवदत् यत् वेदानां, पुराणानां, इतिहासग्रन्थानां च संरक्षणे प्रसारे च महर्षेः योगदानम् अनुपमम् अस्ति। धर्मस्य यथार्थस्वरूपं व्यवहारेणैव प्रकाशते इति तेन विशेषरूपेण प्रतिपादितम्।संस्थानस्य वरिष्ठप्रशासनिकाधिकारी दिनेशकुमारमिश्रः स्वोद्बोधने अवदत् यत् उत्तरप्रदेश- संस्कृतसंस्थानं प्रतिवर्षं गुरुपूर्णिमायाः अवसर उपलक्ष्य विविधकार्यक्रमान् आयोजयति। वर्षात् २०१९ आरभ्य संस्थानेन सेवानिवृत्त- संस्कृत- शिक्षकाणां संस्कृतसेवाव्रतीनां च सम्मानपरम्परा प्रवर्तिता, यस्याः अन्तर्गतं अधुना यावत् १२०० अधिकाः गुरुजनाः सम्मानिताः सन्ति।प्रशासनिकाधिकारी श्रीजगदानन्दझा गुरुपूर्णिमायाः आध्यात्मिकं सांस्कृतिकं च महत्त्वं विवृण्वन् उक्तवान् यत् आषाढपूर्णिमा भारतीय- ज्ञान-परम्परायां विशिष्टस्थानं धारयति। चातुर्मासारम्भे साधुसन्तः एकत्र निवसन्तः ज्ञानस्य प्रसारं कुर्वन्ति। गुरुसान्निध्येन एव साधकः ज्ञानं, शान्तिं, भक्तिं, आध्यात्मिकबलं च प्राप्नोतीति तेन प्रतिपादितम्।अन्ते प्रदेशस्य विविधजनपदेभ्यः आगताः सेवानिवृत्त-संस्कृतशिक्षकाः संस्कृतसेवाव्रतिनश्च सम्मानिताः। उपस्थितैः विद्वद्भिः गुरूणां योगदानस्य स्मरणं कृत्वा गुरु-शिष्यपरम्परायाः संरक्षणे संस्कृतभाषायाः संवर्धने च एतादृशानाम् आयोजनानां महत्त्वं प्रतिपादितम्। कार्यक्रमः सौहार्दपूर्णवातावरणे सफलतया सम्पन्नः।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे प्रवर्तते दशदिवसीया "काव्यरचनाकार्यशाला"




**हिमसंस्कृतवार्ता – बलाहरः (काङ्गडा)।**
केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे २५ जुलैतः ३ अगस्तपर्यन्तं दशदिवसीया "काव्यरचनाकार्यशाला" प्रवर्तते। अस्याः कार्यशालायाः आयोजनं संस्कृतकाव्यरचनायाः प्रोत्साहनाय, साहित्यरुचेः संवर्धनाय तथा नवोदितकवीनां प्रतिभाविकासाय क्रियते।
अस्याः कार्यशालायाः निदेशिका प्रो० सत्यमकुमारी महोदया उद्घाटनसत्रे स्वीयोद्बोधने अवदत्— "अद्यतनयुवपीढ्यां संस्कृतकवित्वस्य सृजनात्मकप्रतिभायाः विकासः, काव्यरचनायां रुचेः संवर्धनं, संस्कृतसाहित्यपरम्परायाः संरक्षणं च अस्याः कार्यशालायाः प्रमुखोद्देश्योऽस्ति। एतादृशीभिः कार्यशालाभिः नवयुवानः संस्कृतभाषायां स्वविचारान् सृजनात्मकरूपेण अभिव्यक्तुं समर्थाः भवन्ति। तेन संस्कृतसाहित्यस्य समृद्धा परम्परा नूतनपीढ्यां सजीवा भवति, संस्कृतकाव्यसृजनस्य च नूतना चेतना जागरूकता च वर्धते।"अस्याः कार्यशालायाः संयोजकः डॉ०श्रीनाथधरद्विवेदीमहोदयः, सहसंयोजकश्च डॉ०श्यामबाबुमहोदयः स्तः। तयोः मार्गदर्शने सम्पूर्णकार्यक्रमस्य सफलसञ्चालनं सुव्यवस्थितरूपेण क्रियते।कार्यशालायाः उद्घाटनसत्रे सारस्वतातिथिरूपेण अष्टावधानी डॉ०उमामहेश्वरमहोदयः, संस्कृतकविः डॉ०राजकुमारमिश्रमहोदयः तथा संस्कृतकविः डॉ०राधावल्लभमहोदयः उपस्थिताः। अपि च डॉ०श्रीधरमहोदयः तथा डॉ०वीणापाणि त्रिपाठमहोदयः अपि सन्निहितौ आस्ताम्। ते स्वीयैः प्रेरणाप्रदैरुद्बोधनैः सहभागिनः संस्कृतसाहित्यस्य अध्ययनाय, मननाय, चिन्तनाय तथा काव्यसर्जनाय प्रेरयन्ति।अस्यां कार्यशालायां देशस्य विविधप्रदेशेभ्यः चयनिताः छात्राः, छात्र्यः, शोधार्थिनः तथा अध्यापकाः सहभागित्वं कुर्वन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नपरिसरेभ्यः तथा देशस्य प्रतिष्ठितोच्चशिक्षणसंस्थाभ्यः प्रतिभागिनः समागताः सन्ति। एतेषु जवाहरलालनेहरूविश्वविद्यालयः,हिन्दूमहाविद्यालयः (दिल्लीविश्वविद्यालयः), दिल्लीविश्वविद्यालयस्य संस्कृतविभागः, कविकुलगुरुकालिदाससंस्कृत-विश्वविद्यालयः (रामटेकम्) इत्यादीनां संस्थानां विद्यार्थी, शोधार्थिनश्च समाविष्टाः सन्ति।कार्यशालायां प्रतिदिनं काव्यरचनायाः मूलतत्त्वानि, छन्दः, अलङ्कारशास्त्रम्, रससिद्धान्तः, व्यवहारिककाव्यलेखनम्, समस्यापूर्तिः तथा काव्यपाठः इत्यादिषु विषयेषु विद्वद्भिः व्याख्यानानि प्रस्तूयन्ते। सहभागिनः स्वकीयकाव्यरचनानां प्रस्तुतीकरणं कुर्वन्ति तथा विद्वद्भ्यः समीक्षां, परिष्कारं, मार्गदर्शनं च प्राप्नुवन्ति। कार्यशालायां संवादात्मकचर्चाः, काव्यगोष्ठ्यः तथा सृजनात्मकसत्राण्यपि नियमितरूपेण आयोज्यन्ते। एषा काव्यरचनाकार्यशाला संस्कृतछात्रेषु शोधार्थिषु च काव्यसृजनस्य प्रति नवीनां दृष्टिं, सृजनात्मकचेतनां तथा साहित्यिकसंवेदनां विकसितुं महत्त्वपूर्णां भूमिकां निर्वहति। अस्याः माध्यमेन सहभागिनः संस्कृतभाषायां स्वप्रतिभामभिव्यक्तुं, भारतीयकाव्यपरम्परां नूतनदृष्ट्या अवगन्तुं, समकालीनविषयेषु संस्कृतेन सर्जनात्मकलेखनं कर्तुं च प्रेरणां प्राप्नुवन्ति। आयोजकानां विश्वासोऽस्ति यत् एषा कार्यशाला संस्कृतसाहित्यस्य सृजनपरम्परायाः संवर्धने, नवोदितकवीनां प्रतिभापरिष्कारे तथा संस्कृतस्य भाविसर्जकपीढीनिर्माणे महत्त्वपूर्णं योगदानं दास्यति।

# डॉ. गीता आर्या हरियाणा प्रदेशस्य मुख्यमंत्री नायब सिंह सैनी महोदयेन सम्मानितं कृतवान्



**हिमसंस्कृतवार्ताः- रघु वत्सः, रोहतकः।**डॉ. गीता आर्या (हरियाणा- संस्कृत- अकादम्याः रोहतक, २०२१ तमे वर्षस्य संस्कृत पुरस्कारः। हरियाणा- संस्कृत- अकादम्याः एवं हरियाणा साहित्य एवं संस्कृति अकादम्याः माध्यमेन घोषितः)। डॉ. आर्या महोदयाः हरियाणा सर्वकारस्य विद्यालय संस्कृतप्रवक्तारूपेण कार्यं कृतवती। अधुना विहिप (भारत संस्कृत परिषद्ः, हरियाणायाः) उपाध्यक्षा अस्ति। सा विद्यावारिधिः (पी.एच.डी.) उपाधिं केन्द्रीय- संस्कृत- विश्वविद्यालय देहलीतः स्वीकृतवान्। सम्प्रति सा स्वातंत्र्यस्य अमृतमहोत्सवस्य विषये (उपलक्ष्ये) पुस्तकद्वयं लिखितवती- एकम् स्वतन्त्रतायाः सेविका (द्वितीया) पुस्तकानाम् स्वतन्त्रतानायकः बिस्मिलः।चयनसमित्याः विभिन्नः विद्वोस् अपि अनयोः पुस्तकयोः बहु प्रशंषामकरोत्। डॉ. आर्या सम्प्रति संस्कृतस्य समर्पिता, विभिन्नेषु संस्कृतग्रन्थेषु संकलनेन सक्रिय भागं गृहणाति। तस्याः पिताश्री जोगेन्द्र सिंहः (भूतपूर्व-चेयरमैन) शिक्षायाः प्रति बहु रुचिं लभते तेन गुरुकुल हसनपुरस्य संस्थापकः सन्ति, गीता महोदयाः गुरुकुलस्य स्नातिका सन्ति, महर्षि दयानन्दस्य अथवा आर्य समाजस्य कृते बहु प्रचार-प्रसारं कुर्वन्ति तथैव संस्कृत भाषां प्रति विशेष रुचिं लभते, संस्कृतस्य प्रचार-प्रसारस्य दायित्वम् अपि लभते। संस्कृतस्य कृते, बाणभट्ट सम्मानेन ते चयनिता। अस्य सयोगस्य सुयोग्य चयनस्य कृते राज्यस्य मुख्यमंत्री नायब सिंह सैनी महोदयः, हरियाणा- संस्कृत- अकादमी निदेशकः डॉ. दिनेश शास्त्री महाभागः चयन समित्याः सर्व विद्वांसश्च प्रति आभारं प्रकटयति।

# कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य व्याकरणविभागे आषाढपूर्णिमायाम् गुरुपूर्णिमोत्सवः



**हिमसंस्कृतवार्ता विश्व मोहन झा , दरभंगा ।**
कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य स्नातकोत्तर-व्याकरणविभागे आषाढपूर्णिमायाः पावनावसरे गुरुपूर्णिमोत्सवः सोत्साहं सम्पन्नः। कार्यक्रमस्य आरम्भः छात्रैः क्रियमाणेन "गुरुर्ब्रह्मा गुरुर्विष्णुः..." इति मङ्गलश्लोकस्य सस्वर-समवेतपाठेन अभवत्। अस्मिन् अवसरे छात्रैः व्याकरणविभागीयैः आचार्यैः च गुरु-शिष्यपरम्परायाः महत्त्वं प्रतिपाद्य स्वश्रद्धासुमानांसि अर्पितानि। जनसम्पर्काधिकारी (PRO) डॉ. निशिकान्तः अवदत् यत् छात्राः श्लोकपाठपुरस्सरं गुरुमाहात्म्यं वर्णितवन्तः। विभागाध्यक्षः डॉ. सीताचरणझाः अवदत् यत् गुरुः केवलं ज्ञानं न ददाति, अपि तु शिष्यस्य व्यक्तित्वमपि निर्माति। प्रो. दयानाथझाः अवदत् यत् विनम्रता-अनुशासनाभ्यां गुरोः उपदेशानां जीवने अङ्गीकरणमेव सच्चेष्यस्य (सच्छिष्यस्य) लक्षणम्। डॉ. साधना शर्मा अवदत् यत् गुरुपूर्णिमा कृतज्ञताप्रकटनाय पावनः अवसरः अस्ति। डॉ. एल. सविता आर्या, डॉ. यदुवीरस्वरूपशास्त्री च अवदतां यत् गुरु-शिष्यपरम्परा भारतीयसंस्कृतेः आत्मा अस्ति ॥

# शान्तिपूर्णवातावरणे प्रारब्धा शास्त्री-पञ्चम-द्वितीय-सेमेस्टर-परीक्षा



**हिमसंस्कृतवार्ता विश्व मोहन झा , दरभंगा ।**
दरभङ्गामण्डले शास्त्री-पञ्चम-द्वितीय-सेमेस्टरयोः परीक्षा मङ्गळवासरात् आरभ्य शान्तिपूर्णे, कदाचारमुक्ते च वातावरणे प्रारब्धा। एषा परीक्षा पालिद्वये आयोज्यते, यस्यां बहवः परीक्षार्थिनः सम्भवन्ति। प्रथमदिने परीक्षाकेन्द्रेषु ससमयमेव परीक्षार्थिनां प्रवेशः अभवत्। प्रवेशात् पूर्वं परीक्षार्थिनाम् अङ्गेक्षणा (जाँच) कृता, विश्वविद्यालयस्य परीक्षासमितेश्च दिशानिर्देशानां पूर्णतः पालनं सुनिश्चितम् अभवत्। शिक्षा-शास्त्रविभाग-परीक्षाकेन्द्रस्य केन्द्राध्यक्षः डॉ. घनश्याममिश्रः अवदत् यत् परीक्षा पूर्णतः शान्तिपूर्णा, अनुशासितरीत्या च सञ्चालिता भवति। अपरत्र 'म.अ. रमेश्वरलता संस्कृत महाविद्यालय' इत्यस्य केन्द्राध्यक्षः डॉ. ममता पाण्डेय व्यज्ञापयत् यत् केन्द्रे सर्वाः व्यवस्थाः सुचारुरूपेण चलन्ति, कापि अव्यवस्था न सञ्जाता। विश्वविद्यालयप्रशासनेन परीक्षायाः सफलसञ्चालनाय सर्वेभ्यः अधिकारिभ्यः आवश्यकाः निर्देशाः दत्ताः सन्ति।

# श्रावणे रुद्राभिषेकः कर्मकाण्डञ्च न तु वाणिज्यम्,

## अपितु लोककल्याणस्य परम्परारक्षणस्य च साधनं भवतु – युवा-वैदिकविद्वांसः





## वरिष्ठपत्रकारेण डॉ. राघवनाथझा-महोदयेन सह गहनसम्भाषणे युवा-आचार्याणां स्पष्टो घोषः – "धनार्जनं न, परम्परारक्षणमेवास्माकं ध्येयम्; समाजः कर्मकाण्डस्य 'इवेण्ट-मैनेजमेण्ट'-प्रवृत्तिं परित्यजतु।"

आगामिनः जुलाई-मासस्य ३० दिनाङ्कात् आरभ्यमाणे पवित्रे श्रावणमासे अद्यतनकाले रुद्राभिषेकस्य कर्मकाण्डस्य च यत् व्यापकीकृतं वाणिज्यीकरणं दृश्यते, तदधिकृत्य संस्कृतपत्रकारितायाः स्वकीयदायित्वं निर्वहन् वरिष्ठपत्रकारः डॉ. राघवनाथ झा महोदयः कतिपयैः युवा-वैदिकविद्भिः सह विस्तृतं दूरवाणी-सम्भाषणम् अकरोत्।अस्मिन् विशेष-सम्भाषणे रुद्राभिषेकस्य वास्तविकं स्वरूपं, वैदिकपरम्परायाः संरक्षणम्, कर्मकाण्डस्य शास्त्रीयमर्यादा, तथा च युवा-आचार्याणां समाजे भूमिका इत्यादीनां विषयाणां विषये गम्भीरः विचारविनिमयः अभवत्।सम्भाषणे संस्कृत-शोधार्थिभिः युवा-आचार्यैश्च एकमुखेन प्रतिपादितं यत् तेषां लक्ष्यं केवलं धनार्जनं नास्ति, अपितु सनातन-ज्ञानपरम्परायाः संरक्षणं, शास्त्रीयाचारस्य प्रतिष्ठापनं, समाजे धर्मचेतनायाः संवर्धनं च वर्तते। तैः धार्मिकानुष्ठानानां व्यापारीकरणं तथा शास्त्रविरुद्धप्रवृत्तयः प्रति गम्भीरा चिन्ता व्यक्ता।

### वरिष्ठपत्रकारेण डॉ. राघवनाथझा-महोदयेन सह सम्भाषणे युवा-वैदिकविदुषां प्रमुखाः अभिप्रायाः

### १. अभिनवकुमारमिश्रः (वैदिकाध्येता, युवा-आचार्यः)

"राघवनाथझा-महोदयेन पृष्टे सति मया स्पष्टतया निवेदितं यत् अद्यतन-विपणीकरणस्य युगे श्रावणमासस्य आत्मिकमहत्त्वं शनैः शनैः क्षीयते। अस्माकं युवा-वैदिकसमुदायः अर्थलोभेन न, अपितु परम्परारक्षणस्य संकल्पेन प्रेरितः अस्ति। यदा धार्मिकानुष्ठानानि केवलं व्यावसायिकदृष्ट्या आयोज्यन्ते, तदा तेषां मूलसङ्कल्पः आध्यात्मिकप्रभावश्च क्षीयते। अतः समाजेन आडम्बरं परित्यज्य शास्त्रसम्मत-वैदिकपरम्परायाः अनुसरणमेव करणीयम्।"

### २. विश्वमोहनझा (वेद-वेदाङ्ग-शोधार्थी, कर्मकाण्ड-साधकः)

"वेद-वेदाङ्गविद्या गुरुपरम्परया, दीर्घकालीनस्वाध्यायेन कठोरसाधनया च लभ्यते। एषा साधना न कदापि विक्रयवस्तु भवितुमर्हति। शास्त्रेषु स्पष्टं निर्दिष्टम् अस्ति यत् धार्मिकानुष्ठानानि शास्त्रपारङ्गतैः योग्याचार्यैरेव विधिपूर्वकं करणीयानि। यदि स्वाध्यायनिरतेभ्यः योग्ययुवाचार्येभ्यः अवसराः न प्रदीयन्ते, तर्हि प्रामाणिक-ज्ञानपरम्परायाः शुद्धता, गरिमा च बाधिते भविष्यतः।"

### ३. आचार्यराजूकुमारमिश्रः (कर्मकाण्ड-पौरोहित्य-मर्मज्ञः)

"कर्मकाण्डं भारतीयसंस्कृतेः आत्मा अस्ति, यस्य परमं लक्ष्यं 'लोकमङ्गलम्' एव। अद्यत्वे तस्य शास्त्रीयशुद्धता शनैः शनैः लुप्यते, तथा च सः केवलं 'इवेण्ट-मैनेजमेण्ट'-रूपेण परिगण्यते। शास्त्रे प्रसिद्धमस्ति— 'मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम्' इति। तस्मात् विधिहीनया पूजया अपेक्षितं फलम् न प्राप्यते। समाजेन व्यावसायिकप्रवृत्तेः परित्यागं कृत्वा निष्ठावद्भिः शास्त्रपारङ्गतैराचार्यैः सहैव अनुष्ठानानि सम्पादनीयानि।"

### ४. केशवकुमारझा (वैदिक-स्वाध्यायी, कर्मकाण्ड-अध्येता)

"युवा-वैदिक-छात्राणां बहुवर्षीयः वेदाध्ययन-परिश्रमः धनार्जनस्य साधनं न, अपितु संस्कृतिसेवायाः व्रतम् अस्ति। यदि मन्दिरसमितयः, धार्मिकसंस्थाः, प्रबुद्धसमाजश्च एतेभ्यः योग्ययुवाचार्येभ्यः अवसरं सम्मानं च न दास्यन्ति, तर्हि भाविपीढी अस्याः विद्यायाः प्रति विमुखा भविष्यति। अतः सनातनपरम्परायाः संरक्षणार्थं युवा-वैदिकविदुषां प्रोत्साहनम् अत्यावश्यकम्।"

**समाजाय संयुक्तः सन्देशः**

सम्भाषणस्य समापनावसरे वरिष्ठपत्रकारः डॉ. राघवनाथ झा महोदयः तथा सर्वे युवा-आचार्याः संयुक्तरूपेण समाजम् आह्वयन्ति स्म यत् अस्मिन् पवित्रे श्रावणमासे भगवान् आशुतोषः श्रद्धया, शास्त्रसम्मत-विधिना, सेवाभावेन च पूजनीयः। धार्मिकानुष्ठानेषु केवलं व्यावसायिकदृष्ट्या कर्म न क्रियताम्, अपितु वेदपाठ-पारङ्गताः, शास्त्रनिष्ठाः, संस्कारसम्पन्नाश्च युवा-आचार्याः प्रोत्साह्यन्ताम्। एतदेव सनातनसंस्कृतेः मूलचेतनायाः संरक्षणस्य, समाजस्य आध्यात्मिकसमुन्नतेश्च सर्वोत्तमः मार्गः भविष्यति।

# Online संस्कृतशिक्षणम् आमुखपटलसमूहे जन्मदिवसोपलक्ष्ये उपलक्ष्ये आयोजितायाः

## संस्कृत- प्रश्नोत्तरी- प्रतियोगितायाः परिणामस्य घोषणा जाता




**हिमसंस्कृतवार्ताः- डॉ. नरेन्द्रराणा।** जन्मदिवसोपलक्ष्ये Online संस्कृतशिक्षणम् आमुखपटलसमूहे आयोजितायाः संस्कृत- प्रश्नोत्तरी- प्रतियोगितायाः परिणामस्य घोषणा जाता। गतदिवसे उत्तरप्रदेशस्य प्रयागराजतः आनन्दविष्णुमहोदयेन डॉ. दीप्तिविष्णुना च स्वपुत्रस्य 'आराध्याविष्णुः' इत्यस्य जन्मदिनस्य अवसरे संस्कृतसामान्यज्ञानप्रश्नोत्तरप्रतियोगिता आयोजिता। अस्यां प्रतियोगितायाम् उत्तरप्रदेशात् प्रशान्त बिपिनसिंहः प्रथमस्थानं प्राप्तं कृतवान्, द्वितीये स्थाने साधना गुप्ता, उत्तरप्रदेशात्, गीता शुक्ला, उत्तर प्रदेशात् तृतीयस्थाने, चतुर्थस्थाने उत्तरप्रदेशात् दिव्या मिश्रा च पंचम-स्थाने अपि उत्तरप्रदेशात् डॉ. महिमा शुक्ला आसीत्, आयोजकश्च गुजरातत: राष्ट्रीय संस्कृत प्रचारक: जगदीश डाभी आसीत्। निर्णयकः उत्तराखंडात् अमित ओली आसीत्। ध्यातव्यं वर्तते यद् फेसबुक् इत्यस्य Online संस्कृतशिक्षणम् समूहे संस्कृत- प्रश्नोत्तरी- प्रतियोगितायाः आयोजनम् अभवत्। पुरस्कार-प्रायोजिका डॉ. दीप्ति विष्णुः सर्वेभ्यः विजेतृभ्यः पुरस्कारं दास्यति ।




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काश्चन विचित्राः वार्ताः मया आनीताः।

**नन्दिनी-** काः ताः वार्ताः? कृपया उच्यताम्।

**काव्या-** प्रथमा वार्ता ग्रामदेशस्य नव-ग्रामात् अस्ति। तत्र संसदि एकेन राजनेत्रा कृत्रिमबुद्ध्या लिखितं भाषणं पठितम्। किन्तु तेन तस्य यन्त्रस्य सूचनाः अपि प्रमादात् पठिताः। क्रमशः...अष्टमे पृष्ठे

# केन्द्रीयसंस्कृतविश्वविद्यालये गुरुपूर्णिमामहोत्सवः : गुरुः जीवनस्य पथप्रदर्शक इति प्रतिपादितम्




**हिमसंस्कृतवार्ताः सत्येन्द्र पाठकः, लखनऊ।** केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे बुधवासरे गुरुपूर्णिमामहोत्सवः श्रद्धया वैदिकपरम्परया च समायोजितः। अस्मिन्नवसरे गुरोः महत्त्वं जीवनस्य पथप्रदर्शकरूपेण प्रतिपादितम्। सम्पूर्णः परिसरः वैदिकमन्त्रोच्चारणेन प्रेरणाप्रदवक्तृभिश्च भक्तिमयेन वातावरणेन परिपूर्णः अभवत्।कार्यक्रमस्य शुभारम्भः छात्रैः छात्राभिश्च ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदानां वैदिकमङ्गलाचरणेन अभवत्। तदनन्तरं दीपप्रज्वलनं, कुलगीतगायनं, 'वन्दे मातरम्' इति सामूहिकगायनं च सम्पन्नम्। छात्रैः स्वागतगीतं प्रस्तूय अतिथीनां सादरमभिनन्दनं कृतम्। परिसरनिदेशकेन पुष्पगुच्छैः स्मृतिचिह्नैश्च अतिथयः सम्मानिताः।मुख्यातिथिः आचार्यः नवजीवनरस्तोगी स्वीयसम्बोधने अवदत् यत् भारतीयगुरुशिष्यपरम्परा केवलं शिक्षाप्रदाने न सीमिता, अपितु शिष्येषु जीवनमूल्यानां, संस्काराणां, नैतिकतायाश्च संवर्धनं करोति। तेन विद्यार्थिनः गुरोः मार्गदर्शनम् आत्मसात्कर्तुं प्रेरिताः। अध्यक्षीयसम्बोधने परिसरनिदेशकः प्रो. सर्वनारायण झा अवदत् यत् गुरुपूर्णिमा भारतीयसंस्कृतेः गौरवमयी परम्परा अस्ति, या ज्ञानस्य, अनुशासनस्य, संस्काराणां च प्रति समर्पणभावं जनयति। शिक्षायाः प्रयोजनं केवलं जीविकोपार्जनं न, अपितु चरित्रनिर्माणं, नैतिकमूल्यविकासः, राष्ट्रस्य प्रति उत्तरदायित्वबोधश्च इति तेन प्रतिपादितम्। प्रो. झा महोदयेन भारतीयज्ञानपरम्परायाः "आचार्यदेवो भव" इत्यस्य आदर्शस्य उल्लेखः कृतः। तेन उक्तं यत् गुरोः उपदेशानां पालनं मनुष्यं समाजनिर्माणे राष्ट्रनिर्माणे च समर्थं करोति। समारोहे आचार्यवन्दना, स्तोत्रगायनं च सम्पन्नम्, येन सम्पूर्णं वातावरणम् आध्यात्मिकभावेन ओतप्रोतम् अभवत्।

# भागलपुरनगरस्य डीएवी- पब्लिक- स्कूल- बरारी- विद्यालयस्य प्राङ्गणे गुरु गुरुपूर्णिमावसरे विशेषकार्यक्रमः





**हिमसंस्कृतवार्ताः- डा. विमलेश झा, भागलपुर, बिहार**

बिहारराज्यस्य भागलपुरनगरस्य डीएवी- पब्लिक- स्कूल- बरारी- विद्यालयस्य प्राङ्गणे गुरु पूर्णिमायाः पावनावसरे विशेषकार्यक्रमस्य भव्यं आयोजनम् अभवत्। अस्मिन् शुभावसरे आयोजितायां विशिष्टप्रार्थनासभायां विद्यालयस्य छात्राः मधुरं गुरुभजनं प्रस्तुतवन्तः, गुरुं प्रति स्वश्रद्धां भक्तिं च प्रकटितवन्तः। कार्यक्रमे विद्यालयस्य शिक्षकः डॉ. विमलेश झामहोदयः “मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव” इति वैदिकसन्देशस्य माध्यमेन गुरोः महत्त्वं विवृण्वन् विद्यार्थिनः जीवने गुरोः मार्गदर्शनस्य अनिवार्यतां प्रतिपादितवान्। विद्यालयस्य शिक्षिका कविता कुमारीमहोदया स्वरचितया कवितया समस्तगुरून् प्रति श्रद्धासुमनं समर्पितवती। शिक्षकः सुनीलकुमारमिश्रः गुरोः आदर्शस्वरूपं तस्य समाजे राष्ट्रनिर्माणे च योगदानम् इति विषये स्वविचारान् प्रस्तुतवान्। विद्यालयस्य छात्रा समृद्धि सिंह अपि गुरोः महत्त्वं विषये स्वकीयान् विचारान् प्रस्तुतवती। अस्मिन्नवसरे विद्यालयस्य प्राचार्यः सह सहायक- क्षेत्रीयाधिकारी च अनिलकुमारमहाशयः स्वसम्बोधने भारतस्य गौरवमयीं गुरु-शिष्यपरम्परां स्मारयन् उक्तवान् यत् प्रत्येकं विद्यार्थिनः स्वगुरून् प्रति नित्यं सम्मानभावः कर्तव्यरूपेण धारयितव्यः। तेन वैदिकहवनस्य वैज्ञानिकता, पर्यावरणीय- महत्त्वं स्वास्थ्यवर्धकप्रभावाः च एतेषां विषयाणाम् उपरि अपि विस्तरेण प्रतिपादनं कृतवान्। गुरुपूर्णिमावसरे विद्यालयस्य अष्टमकक्षायाः छात्राः विशेषहवनकार्यक्रमे उत्साहपूर्वकं भागने गृहीत्वा वैदिकमन्त्राणामुच्चारणेन सम्पूर्णं वातावरणम् आध्यात्मिकं प्रेरणादायकं च अकुर्वन्। अस्य कार्यक्रमस्य सफलसञ्चालने निरेन्द्रप्रकाशसिंहः, आशीषकुमारदासः, सुजीतकुमारमण्डलः, अभिषेककुमारशर्मा, अभिनवकुमारः, डॉ. शिवशङ्करकुमारसिंहः, विनीताभारती, प्रगतिमिश्रा, लक्ष्मीकुमारी, विद्यालयस्य शिक्षकशिक्षिकाः, शिक्षकेत्तरकर्मचारिणश्च प्रशंसनीयं योगदानम् प्रदत्तवन्तः।

# कुलपतेः आदेशेन आपदाप्रबन्धनप्रशिक्षणार्थं गठीतायाः ११-सदस्यीयायाः आयोजनसमित्याः महत्त्वापूर्णा उपवेशनम्



## बिहार-राज्य-आपदाप्रबन्धन-प्राधिकरणस्य सौजन्येन चतुर्षु गणेषु (बैच) आहत्य ८०० स्वयंसेवकाः प्राप्स्यन्ति प्रशिक्षणम्

'माय भारत पोर्टल' इत्यत्र पञ्जीकृताः १८ तः ४० वर्षवयस्काः दरभङ्गा-मधुबनी-समस्तीपुर-मण्डलानां सक्रियाः स्वयंसेवकाः प्रशिक्षणं गृहीत्वा भविष्यन्ति 'आपदामित्राणि'। ललितनारायणमिथिलाविश्वविद्यालयस्य (दरभङ्गा) कुलपतेः प्रोफेसर-सञ्जयकुमारचौधरिणः*आदेशेन आपदाप्रबन्धनप्रशिक्षणार्थं गठीतायाः ११-सदस्यीयायाः आयोजनसमित्याः महत्त्वापूर्णा उपवेशनम् (बैठक) 'बी. एड्.' (नियमित) प्राङ्गणे 'एन. एस्. एस्.'-समन्वयक-प्रथमस्य **डॉ. आर. एन्. चौरसिया* महोदयस्य अध्यक्षतायाम् आयोजितम्। अस्मिन् उपवेशने डॉ. शबनम कुमारी, डॉ. अरविन्दकुमारमिलनः, डॉ. प्रियङ्काराः, डॉ. सोनूरामशङ्करः, डॉ. उदयकुमारः, डॉ. रीताकुमारी, डॉ. योगेश्वरसाहः, डॉ. अनुपमप्रिया, मुकेशकुमारझाश्च सहभागिनः अभवन्।कुलपतेः प्रो. सञ्जयकुमारचौधरिणः निर्देशानुसारं निर्णयः गृहीतः यत् एषः सप्तदिवसीयः आवसीयप्रशिक्षणशिविरः अत्यन्तं सुचारुरूपेण आयोजयेत्

**नन्दिनी-** हा हा! अतीव हास्यास्पदम् एतत्! यन्त्रस्य सूचनाः अपि पठिताः इति महद् आश्चर्यम्। द्वितीया वार्ता का अस्ति?

*काव्या-* नवनगरे एकस्मिन् विद्यालये शिक्षिका- रूपि- यन्त्रिकायाः योजना स्थगिता। यतः तस्याः यन्त्रिकायाः जनिकया अश्लील-यन्त्रिकाः अपि निर्मिताः।

नन्दिनी- अहो! महती लज्जाजनिका एषा घटना! विद्यालये तादृशी यन्त्रिका न उचिता एव। अग्रे किं जातम्?

काव्या- एका परिचारिका अरण्ये विहरन्ती लौह- शलाकया विद्धा। तथापि साहाय्यं प्राप्तुं तया दश- क्रोश- परिमितः मार्गः

पद्भ्याम् एव क्रान्तः। सा महद् धैर्यं दर्शितवती अस्ति।

नन्दिनी- तस्याः धैर्यम् आश्चर्यकरम् एव! सा प्राणान् रक्षितवती अस्ति इति प्रमोद-स्थानम्। अन्तिमा वार्ता का अस्ति?

**काव्या-** अश्वप्रियद्वीपे एकेन पर्यटकेन महिला- कारागारः एव विश्रान्तिगृहम् इति चिन्तितम्। सः तत्र प्रविष्टवान् अस्ति, किन्तु रक्षकैः सः बोधितः।

**नन्दिनी-** अहो तस्य मूढता! कारागारः विश्रान्तिगृहम् इति भ्रान्तिः अतीव विचित्रा। एताः सर्वाः वार्ताः अतीव विचित्राः सन्ति। धन्यवादः काव्ये।

# गुरुपूर्णिमायाः महत्त्वम् (पर्वविशेषः)

-डॉ विमलेशझा, डीएवी पब्लिक स्कूल, बरारी भागलपुर, बिहार

## अखण्डमण्डलाकारं व्याप्तं येन चराचरम्। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

भारतीयसंस्कृतौ गुरोः स्थानं विशिष्टतमम् अस्ति। यथा माता जन्म ददाति, पिता पालनं करोति, तथैव गुरुः जीवनस्य सत्यं, धर्मं, ज्ञानं, सदाचारं च शिक्षयति। अतः एव उपनिषत्सु "मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव।" इति आदेशः प्रदत्तः। गुरुर्ब्रह्मा, गुरुर्विष्णुः, गुरुर्देवो महेश्वरः इति सुप्रसिद्धः श्लोकः गुरोः दिव्यस्वरूपं निरूपयति। भारतीयपरम्परायां गुरोः पूजनार्थं आषाढमासस्य पूर्णिमातिथिः गुरुपूर्णिमा इति नाम्ना विख्याता अस्ति। गुरुपूर्णिमा न केवलं धार्मिकः उत्सवः, अपि तु ज्ञानस्य, संस्कारस्य, कृतज्ञतायाः, आत्मविकासस्य च महोत्सवः अस्ति। अस्यां तिथौ महर्षिव्यासस्य जन्मदिनम् अपि मन्यते, अतः एषा व्यासपूर्णिमा इति नाम्नापि प्रसिद्धा अस्ति।

"गु" शब्दः अन्धकारस्य वाचकः, "रु" शब्दः तन्निवारणस्य द्योतकः। अतः यः अज्ञानरूपम् अन्धकारं निवारयित्वा ज्ञानरूपं प्रकाशं प्रददाति, स एव गुरुः। शास्त्रे उच्यते-

### "गुकारस्त्वन्धकारः स्यात् रुकारस्तन्निवारकः। अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥"

गुरुः केवलं पाठ्यविषयज्ञानं न ददाति, अपि तु जीवनस्य आदर्शान्, नैतिकमूल्यानि, कर्तव्य- परायणताम्, अनुशासनं, सेवाभावं, राष्ट्रभक्तिं, मानवतां च शिक्षयति। भारतीयपरम्परायां महर्षिः वेदव्यासः पुराणानि, महाभारतं च प्रणीतवान्। तेन सम्पूर्णमानवजातिः ज्ञानरत्नैः समृद्धा अभवत्। अतः महर्षेः वेदव्यासस्य सम्मानार्थं गुरुपूर्णिमा आचर्यते। ऋषयः आश्रमेषु शिष्याणां चरित्रनिर्माणं कुर्वन्ति स्म। गुरुकुलेषु शिष्याः गुरोः सेवां कृत्वा विद्यामधीयन्ते स्म। गुरुपूर्णिमायां ते स्वगुरवे श्रद्धया प्रणम्य आशीर्वादं प्राप्नुवन्ति स्म। एषा परम्परा अद्यापि भारते जीवति। एतस्य दिवसस्य धार्मिकं महत्त्वम् अपि वर्तते। सनातनधर्मे गुरोः स्थानं देवताभ्यः अपि श्रेष्ठम् उच्यते।

**"गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।गुरुसाक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः॥"**

भगवान् श्रीकृष्णः अर्जुनस्य गुरुर्भूत्वा भगवद्गीतायाः दिव्योपदेशं दत्तवान्। श्रीरामः अपि महर्षेः वसिष्ठस्य तथा विश्वामित्रस्य शिष्यः आसीत्। अतः स्पष्टं भवति यत् ईश्वरावताराः अपि गुरुमहत्त्वं स्वीकुर्वन्ति। विद्यालयेषु गुरुपूर्णिमादिने छात्राः स्वशिक्षकान् सम्मानयन्ति। पुष्पैः, अभिनन्दनपत्रैः, सांस्कृतिककार्यक्रमैः, गुरुवन्दनया च गुरुभक्तिं प्रकटयन्ति। अस्य उत्सवस्य माध्यमेन विद्यार्थिनः विनयशीलाः, कृतज्ञाः, अनुशासिताः च भवन्ति। समाजस्य उन्नतिः सद्गुरूणां मार्गदर्शनेन एव भवति। यत्र गुरवः सम्मानिताः भवन्ति, तत्र संस्कारयुक्ताः नागरिकाः निर्मीयन्ते। गुरुपूर्णिमा समाजे ज्ञानस्य, सद्भावस्य, नैतिकतायाः च प्रचारं करोति। आध्यात्मिकमार्गे गुरोः आवश्यकता अत्यावश्यकी अस्ति। गुरु एव शिष्यं आत्मज्ञानस्य मार्गे नयति। उपनिषत्सु स्पष्टमुक्तम्- "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्"। गुरुकृपया एव आत्मज्ञानं, मोक्षमार्गस्य बोधः, ईश्वरभक्तिः च सम्भवति। मानवैःगुरुपूर्णिमादिने प्रातःकाले स्नानं कृत्वा गुरोः पूजनं क्रियते। सर्वैः गुरवे पुष्पाणि, फलानि, वस्त्राणि, दक्षिणां वा समर्प्य आशीर्वादः प्रार्थ्यते। विद्यालयेषु प्रार्थनासभा, गुरुवन्दना, भाषणानि, सांस्कृतिककार्यक्रमाः, यज्ञः, वृक्षारोपणम्, सेवाकार्यक्रमाश्च आयोज्यन्ते। आधुनिकसमाजे अपि गुरुपूर्णिमायाः प्रासङ्गिकता दृश्यते। वर्तमानकाले प्रौद्योगिकीविकासेन ज्ञानस्य साधनानि बहूनि सन्ति, तथापि गुरोः स्थानं कदापि न्यूनं न अभवत्। पुस्तकेभ्यः सूचना लभ्यते, किन्तु जीवनमार्गदर्शनं केवलं गुरु एव ददाति। यान्त्रिकयुगे अपि शिक्षकाः विद्यार्थिनां व्यक्तित्व- विकासस्य प्रमुखाः प्रेरकाः सन्ति। अत्र वयं वक्तुं शक्नुमो यत् गुरुपूर्णिमा भारतीयसंस्कृतेः गौरवमयी परम्परा अस्ति। एषा अस्मान् स्मारयति यत् गुरोः कृपया एव ज्ञानं, संस्कारः, आत्मविश्वासः, सफलजीवनं च प्राप्तुं शक्यते। अतः सर्वैः विद्यार्थिभिः गुरून् प्रति श्रद्धा, विनयः, कृतज्ञता च धारणीया। गुरोः सम्मानम् एव राष्ट्रस्य, समाजस्य, संस्कृतेः च सम्मानम् अस्ति। अन्ते वयं सर्वे मिलित्वा प्रार्थयामः-

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥**

अस्मिन् अवसरे वयं सर्वान् गुरून् प्रति प्रणामाञ्जलिं समर्पयामः।। सर्वेभ्योः गुरुभ्यो नमः।।

# सीमाञ्चले चाय-कृषये लप्स्यते नवीनः आयामः

## ₹६.५५ कोटिरूप्यकाणां चाय-विकासयोजनायै स्वीकृतिः

### "चाय-कृष्या आत्मनिर्भरिणः भविष्यन्ति सीमाञ्चलस्य कृषकाः" श्री विजय कुमार सिन्हा




**हिमसंस्कृतवार्ता राघव नाथ झा।** माननीयः कृषि मन्त्री श्री विजय कुमार सिन्हा अवदत् यत् सीमाञ्चलक्षेत्रे चाय-कृषेः प्रोत्साहनाय कृषकाणाम् आयवृद्धेः निश्चयीकरणाय च दिशि एकः महत्त्वपूर्णः निर्णयः गृहीतः अस्ति। राज्यसर्वकारेण किशनगञ्ज-पूर्णिया-कटिहार-मण्डलेषु ₹६.५५ कोटिरूप्यकाणां व्ययेन चाय-विकासयोजनायै स्वीकृतिः प्रदत्ता। एषा योजना सीमाञ्चले कृषि-विविधीकरणाय नवीनां गतिं प्रदानेन सह-सह कृषकेभ्यः रोजगारस्य आयस्य च नवीनान् अवसरान् सृजिष्यति। माननीयः कृषि मन्त्री अकथयत् यत् बिहार-सर्वकारः कृषकाणाम् आयवर्धनार्थं पारम्परिक-कृष्या सह उच्चमूल्ययुक्तानां शस्यानां प्रवर्धनाय कटिबद्धः अस्ति। सीमाञ्चलस्य जलवायुः प्राकृतिक-स्थितयश्च चाय-कृषये अत्यन्तम् अनुकूलाः सन्ति। सर्वकारः अस्य क्षेत्रस्य प्राकृतिक-क्षमतायाः अधिकतमम् उपयोगं कृत्वा कृषकान् आर्थिकरूपेण सशक्तिकर्तुं दिशि निरन्तरं कार्यं करोति। माननीयः मन्त्री अभाषिष्ट यत् अस्याः योजनायाः प्रभावेण सीमाञ्चले चाय-कृषेः विस्तारः भविष्यति, नवीनानां कृषकाणां संयोजनं वर्धिष्यते, तथा च क्षेत्रे कृषि-आधारित-उद्यमितायै स्थानीय-रोजगाराय च प्रोत्साहनं प्राप्स्यते। अनेन कृषकाणाम् आयवर्धनेन सह सीमाञ्चलस्य प्रत्यभिज्ञानं (पहचान) देशस्य उदीयमान-चाय-उत्पादकक्षेत्ररूपेण अधिकं सुदृढं भविष्यति। तेन प्रोक्तं यत् प्रधानमन्त्रिणः श्री नरेन्द्र मोदी महोदयस्य नेतृत्वे 'द्विचक्र-यन्त्र' (डबल-इंजन) सर्वकारः कृषिक्षेत्रे आत्मनिर्भरतां मूल्यसंवर्धनं च विशेष-प्राथमिकतां ददाति। बिहार-सर्वकारः तां विचारधारामेव अग्रे नयन् कृषकान् नवीनाभिः लाभकारिणीभिः च शस्यप्रजातिभिः सह संयोजयितुं कार्यं करोति। चाय-विकासयोजना अस्यामेव दिशि एका महत्त्वापूर्णा पहलः (प्रयासः) अस्ति, या सीमाञ्चलस्य कृषि-विकासे सीमाप्रस्तरः (मील का पत्थर) सिद्धा भविष्यति। माननीयः मन्त्री विभागीय-अधिकारिभ्यः निर्देशम् अयच्छत् यत् योजनायाः कार्यान्वयनम् पूर्ण-पारदर्शितया समयबद्धरीत्या च सुनिश्चितं क्रियेत, येन पात्र-कृषकाः अस्याः लाभम् शीघ्रमेव प्राप्नुयुः, योजनायाः सर्वाणि लक्ष्याणि च प्रभावकारि-रूपेण सिद्धानि भवेयुः।

# हाई इम्पैक्ट' (उच्च-प्रभाव) योजनाभिः परिवर्तिष्यते बिहारस्य नगराणां स्वरूपम्

## प्रतिनगरं दृश्यते विकासस्य नवीनं रूपम्, निर्मास्यते 'सिग्नेचर रोड' (प्रमुखमार्गः)"संस्करिष्यन्ते बिहारस्य नगराणि" श्री नीतीश मिश्रा

राघव नाथ झा। नगरविकास-आवासमन्त्री श्री नीतीश मिश्रा अवदत् यत् राज्यस्य सर्वेषु नगरनिगमेषु, नगरपरिषत्सु, नगरपञ्चायतेषु च नागरिकेभ्यः उत्तराः नागरिकसुविधाः प्रदातुं तथा नगराणां समग्र-सुनियोजित-विकासाय अल्पकालिक-दीर्घकालिक-विकासलक्ष्याणाम् अनुगुणं योजनानां चयनं प्रभावी-क्रियान्वयनं च सुनिश्चितं करिष्यते। श्री मिश्रा अकथयत् यत् माननीयस्य मुख्यमन्त्रिणः श्रीसम्राटचौधरिणः एषः दृष्टिकोणः (विज़न) अस्ति यत् बिहारस्य प्रत्येकं नगरम् आधुनिकम्, सुव्यवस्थितम्, स्वच्छम्, हरितम्, उच्चस्तरीय-नागरिकसुविधाभिः सुसज्जितं च भवेत्। समयबद्ध-उच्चप्रभावयुक्त-विकासयोजनाभिः, सुदृढ-आधारभूतसंरचनया, जनकेन्द्रित-नागरिकनियोजनेन च एतादृशानि नगराणि विकसितानि क्रियेरन्, यानि नागरिकेभ्यः उत्तमम् जीवनस्तरम्, सुरक्षितं वातावरणम्, नवीनान् आर्थिक-अवसरान् च प्रदानं कुर्युः।

श्री मिश्रा व्यज्ञापयत् यत् सर्वैः नगरनिकायैः एतादृशानि अल्पकालिकलक्ष्याणि निर्धारणीयानि, यानि अक्टूबर, २०२६ यावत् पूर्णानि भवेयुः। एतदर्थं योजनानां शीघ्रचयनम्, प्रशासनिकस्वीकृतिः, समयबद्धरूपेण च कार्यान्वयनम् सुनिश्चितं करिष्यते, येन निर्धारित-समयसीमाभ्यन्तरे योजनानां लाभः सर्वसाधारण-नागरिकान् यावत् प्राप्नुयात्।

तेन प्रोक्तं यत् अनेन सह एव सर्वैः नगरनिकायैः दिसम्बर, २०२८ यावत् पूर्णानि क्रियमाणानि दीर्घकालिक-विकासलक्ष्याणि अनुसृत्य अपि योजनानां चयनं कार्यान्वयनं च करणीयम् भविष्यति। योजनानां चयने अस्य विषयस्य विशेषध्यानं धास्यते यत् ताः अत्यन्तं प्रभावशालिन्यः भवेयुः, तासां लाभः च निकायक्षेत्रस्य अधिकतम-जनसङ्ख्यायै प्राप्येत। अनेन नगरक्षेत्रेषु आधारभूतसंरचना सुदृढा भविष्यति, नागरिकाणां जीवनस्तरे च व्यापकः सुधारः आगमिष्यति।

श्री मिश्रा अभाषिष्ट यत् राज्यस्य प्रत्येकस्मिन् नगरनिगमे, नगरपरिषदि, नगरपञ्चायते च १ तः २ किलोमीटर-दीर्घः एकः प्रमुखमार्गः "सिग्नेचर रोड" (प्रमुखमार्गः) रूपेण विकसितः करिष्यते। अस्य मार्गस्य विकासः योजनाबद्धरीत्या भविष्यति, यस्मिन् मार्गचौडीकरणम्, सौन्दर्यीकरणम्, आधुनिका दीपव्यवस्था (प्रकाशव्यवस्था), हरितपट्टिका, वृक्षारोपणम् इत्यादयः आवश्यक्यः नागरिकसुविधाः विकसिष्यन्ते। एतान् मार्गान् सम्बद्ध-नगरनिकायस्य पहिचानरूपेण (पहचान) विकसितुं लक्ष्यं निर्धारितम् अस्ति।